CC-0. Digitized by eGangotri and MIDF- Delhi

वल्लरी

भरतराजः पन्तः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वल्लरी

जयतु संस्कृतं सूक्ति-चातुरी
जयतु संस्कृतं काव्य-माधुरी
जयतु संस्कृतं नीति-निर्झरी
जयतु संस्कृतं यस्य वल्लरी

भरतराजः पन्तः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

लेखकः भरतराजः पन्तः साहित्याचार्यः

प्रकाशकः स्वयमेव

सर्वेऽधिकाराः लेखकायत्ताः

प्रथमं संस्करणम् पञ्चशतम्

दिनाङ्कः श्रावणे सप्तमे च व्यासजयन्त्यां पूर्णिमायां

मूल्यम् केवलं सहयोगार्थं रूप्यकाणां तु विंशतिः

मुद्रकः लुषमुद्रणालयः

बानेश्वरः, काष्ठमण्डपः

☎ ४७३५८६

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शुभसम्मतिः

निलिम्पगीर्विलासपेशलधीवराणां सविधे न तिरोहितं कविकान्तनितान्तदान्तसाहित्यसुधानिधिसाहित्याचार्य्यपण्डितप्रवर–भरतराजपन्तमहाभागानां यशः। प्रतिपित्सागोचरसमजनितभावभरितेन परिकर्मितं कविताहासविलासकृत्यन्नयनगोचरीकृत्यातीव मोमुद्यते चेतः। 'अपारे काव्यसंसारे कविरेकः प्रजापतिः' इति प्राचां स्थविराणामाभाणकमुररीकृत्य बलाबलविचारणावसरे वस्तुसत्यरूपेणाङ्गीकर्तुं शक्यते किल काव्यसंसारे कविकान्तविक्रान्तः प्रजापतिरिति नात्र शङ्कापङ्ककलङ्कावसरः। निर्मितिरियन्निश्चप्रचं किमपि नावीन्यप्रावीण्यञ्चादधातीति।

आलङ्कारिकजगति प्रख्यातयशसां तत्र भवतां सुकृतिदत्तपन्तमहाभागानां विलक्षणविचक्षणवंशपरम्परायां पन्तोपनामकभरतराजोऽन्तिमः प्रतिभाति। अस्मिन् पन्तकुले रमापतिहरिरामशिवरामभवदत्तव्यासदत्तश्रीदत्तज्वालादत्तसुकृतिदत्तप्रभृतयो भूयांसो विद्वांसो बभूवुः। परञ्च तेषां सारस्वती सुषमा सम्प्रति विलुप्तेव दरीदृश्यते।

प्रस्तुतपद्यसङ्ग्रहो भरतराजपन्तमहाभागानां समये समये स्वान्ते स्फुरितभावो वर्तते। एकोनविंशतिशीर्षकानि लघुकाये पुस्तके सन्निवेशितानि, तत्राप्युपशीर्षकान्यपि विलसन्ति। वैदर्भी रीतिः सुरीतिं भजते। आकारेण नाकरः, परमार्थाकारेणाकरं प्रतिपद्यते। मृदुलपदविन्यासेनापूरितानि पद्यानि कस्य सचेतसो मनांसि नावर्जयन्ति? अकृत्रिमो वाणीविलासः, नानाविधच्छन्दसामलङ्काराणाञ्च गुम्फनमेव विचित्रचित्रमुपस्थापितमिति सर्वदा प्रसीदामो वयम्। किमधिकम्।

– डा. स्वामी प्रपन्नाचार्यः

मृगस्थली, काष्ठमण्डपः २०५१।४।४

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

साधुवादः

पद्यानि मञ्जुलपदावलिगुम्फितानि
रुच्याऽध्यगां भरतपन्तमहोदयस्य ।
गीर्वाणवाङ्निहितगौरवदीपकेन
हृष्टोऽहमस्य सुहृदः कृतिकौशलेन ॥

नात्र क्वचित्कठिनतार्थविबोधनेऽस्ति
नच्छन्दसो मधुरिमा लघुतामुपेता ।
एतादृशी सुललिता गुणगौरवाढ्या
दृष्टा तनोति कविता दयितेव मोदम् ॥

नानाविधेषु विषयेषु निबद्धपद्या
सेयं मनोज्ञरचना नितरां प्रशस्या ।
याऽद्यापि संस्कृतगिरो विभवं प्रदर्श्य
शाब्द्या श्रिया सहृदयान् ससुखीकरोति ॥

कान्तान्यलङ्कृतियुतानि पदानि युञ्जन्
नूनं कविर्भरतराज इहास्ति सिद्धः ।
यः कोऽपि संस्कृतरुचिः कवितानुरागी
तस्मै प्रदास्यति हृदा किल साधुवादम् ॥

सैषैकविंशशतकेऽप्युपलब्धरूपा
प्रौढप्रयोगभरिता कवितातिहृद्या ।
सन्तन्वती सुरगवीमहिमानमुर्व्यां
कुर्यान्मुदं सुमनसां शरदः शतानि ॥

— खेमराजः केशवशरणः

सिकलः, काष्ठमण्डपः २०५१।४।६

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

केचन सुप्रलापाः

अनन्तवाङ्मयजलनिधिसलिलायिता क्वेयं सुरसरस्वतीसरणिः ? क्व चाऽहं पूर्वजपूर्वसूरिलब्धसंस्कारतया गीर्वाणवाणीधुरीणानां चरणरेणुरणोरणीयानशरणोऽपि सुरसरस्वतीसरणिमनुसरणं चिकीर्षु छात्रमात्रः ? 'बलिना वेदमार्गोऽयं कलिना कवलीकृतः' इति चरितार्थतां गतवत्यार्थिकेऽपि युगे भौतिकभेरीनिनादोपहता वीणेवाध्यात्मसाधिका सुरसरस्वती संप्रति कं प्रति प्रत्यर्थिपराभूततया क्रन्दमाना गौरिव दरीदृश्यते । वेदोपनिषदारण्यकशतपथब्राह्मणादीनां मनुचाणक्यवात्स्यायनव्यासादीनां धर्मार्थकाममोक्षपुरःसरचतुर्वर्गसाधकानां शिक्षाकल्पनिरुक्तकोषव्याकरणच्छन्दोज्यौतिषादीनां कपिल – कणाद – गौतम – पतञ्जलि – व्यास – जैमिनीप्रभृतिप्रणीतानां च परिचयः केवलं पुस्तकालय एव वर्तते नाम । आदिकविवाल्मीकिप्रस्तुतस्य शतकोटिप्रविस्तरस्य रघुनाथचरितस्यांशमात्रस्यापि बोद्धारो नोपलभ्यन्ते । ब्रह्मसूत्रप्रभृतिपञ्चमवेदायितभारताद्यष्टादशपुराणोपपुराणानां प्रसङ्गोऽपि विस्मृतिपथं गतोऽधुना । जगद्गुरोः शङ्कराचार्यस्याऽपि समाप्यवेदान्तोवन्तविशिष्टकवित्वपरिपाटीमपि नैवावलम्ब्यते । का कथा मादृशस्याणुमात्रस्य वराकस्य ।

नाऽयं समयो रामचन्द्रस्य राज्ञो विक्रमस्य वाऽशोकस्य ।
न मे स्तेनो जनपदे न कदर्यो न मद्यपः ।
नाऽनाहिताग्निर्नाऽविद्वान् न स्वैरी स्वैरिणी कुतः !

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

इत्यादर्शपथपरिपन्थितां गता सामाजिकी दुरवस्था परितोऽवलोक्यते। विशीर्णवर्णाश्रमव्यवस्थतया विरहितमर्यादतया च सर्वत्र वर्णसंकरस्यैव प्राधान्यं प्राचुर्येण बोभूयते। अर्थकरीमांगलभाषां मन्यमानैर्न पठ्यते संस्कृतम्। न च लिख्यते संस्कृते पंक्तिमात्रमपि। यस्मिन् कस्मिन् समये जायमाने समारोहे प्रमुखातिथितया भाषमाणैर्गण्यमान्यमन्यैः प्रदर्शितबाह्या-दर्शैः शशभृङ्गायत एव सुरसरस्वतीसमुन्नतिसन्दर्भश्चास्मिन् विषमये समये।

संस्कृतं किञ्चिन्मात्रममधीत्यापि च्छन्दोलङ्कारध्वनिरसरीतिभङ्गी-भणित्यौचित्यादिबोधराहित्येऽपि साहित्येऽग्रसराः परित्यक्तपूर्वाग्रहतया संस्कृतपरिपन्थिनोऽपि पदासीनाः प्रमत्ताः साऽऽटोपं नरीनृत्यन्ति सगर्व-गर्जितम्। कालिदासश्रीहर्षप्रभृतिभिः शारदावरदतनयैः काव्यकौशलकीर्ति-कौमुदीधवलितविष्टपैः कृतेऽपि काव्यप्रबन्धे काव्यत्वमेव नास्तीत्यनर्गल-प्रलापैः किञ्चिन्मात्रावशिष्टामपि पूर्वीयसिद्धान्तसरण्यनुसरणपरायणान् प्रतिभावतारान् समूलमुन्मूलयितुमेवोत्सहन्तेऽधुना। स्वकीयामयोग्यतामस-मर्थतामपि व्यञ्जयितुं स्तोकमपि न त्रपन्ते निरपत्रपाश्चर्चितंमन्याः पुरस्कारलोलुपाः कविब्रुवाः।

नेपालीयराष्ट्रभाषायामपि नवतिप्रतिशताधिकप्रयुक्ततया ग्राम्येतर-विशिष्टसभ्यशोभनतया ललितकान्तपदावलीप्रयोजनीयतया चोत्कर्षा-धायिनीति सर्वसमर्थनीयतां गतेयं सुरसरस्वती। यल्लब्धसंस्काराः कवि-शिरोमणिमहाकविपण्डितराजपुरस्सराः प्रतिभावातराः कीर्तिताः सन्त्येव कीर्तिकलेवरेण। तथापि संकुचितमनोवृत्तितया कार्षापणलम्पटतया परद्रोहापहरणहत्याहिंसाव्यसनितया मानवतावादितयापि व्यापादितमानव-तया दानवतया निहतनैतिकतया मत्सरित्तयाऽस्मितया पुच्छविषाणविकलपशु-प्रचुरतया मिथ्यापवादावधीरितसंस्कृततया परोत्कर्षासहिष्णुतया चेयं वसुमतीरतीव भारवती न द्रुमैर्न गिरिभिर्न समुद्रैः। किन्तया चिन्तया यातयामया ?

प्रत्यर्थिपराभूतपौरुषेणापि भयानकाभिशापानलावलीढमानसेनापि

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नवभाजनलग्नसंस्कारतया मयाऽधुनापि न पार्यते विस्मर्तुं संस्कृतम् । संस्कृतेनैवाहमुत्थापितः पालितो रक्षितश्च । सकौशलमध्यापनं कविताखण्डकाव्यमहाकाव्यव्यंग्यनिबन्धादिनेपालीयसाहित्यलेखनपाटवं च संस्कृतस्यैवानुग्रहः । अतो मामकी सुरसरस्वतीसरणिश्रद्धा चिरन्तनापि नूतना । यत्प्रस्तूयते तत् सहृदयहृदयाह्लादकत्वाभावाद्विदुषां न किञ्चित्क्षोदक्षमम् । तथापि स्वल्पापि सूक्ष्मापि समर्चनास्वरूपा सुरसरस्वत्यां व्यञ्जनीया कृतज्ञता मयेति प्रेरयति पुरातनः संस्कारः । तदत्र तादृशानां कृतज्ञताविषयीभूतानां कवितानां संकलनमात्रम् । आचार्यपरीक्षावसरे कृताभ्यासानां 'जयतु संस्कृत'स्य कतिपयेऽङ्के प्रकाशितानां भोलानाथ-माधव-हेमचन्द्रादिषु कृतपत्रव्यवहाराणां स्वतन्त्रमभिव्यञ्जितानां चाऽत्र संग्रहः । शिशिक्षुमात्राणां छात्राणां कृतेऽपि किञ्चिदुपयोगाय स्याद्यद्यात्मानं धन्यं मन्ये । नीरक्षीरविवेकचुञ्चुचञ्चुभिर्विद्वज्जनराजहंसैर्यदि विविच्येत तर्हि प्रस्तरान्वेषणे देवतोपलब्धिरेवानुभूयेत । यतः

न चाच्युतत्वं परमात्मना विना
न पूर्णता क्वापि महेश्वरादृते ।
च्युतिस्तु सर्गेषु निसर्गतो भवेत्
क्रमं समालम्ब्य तनोत्यपूर्णताम् ।।

न कुसुमं न च सौरभवैभवं
न च मिलिन्दगणो न च गुञ्जितम् ।
परिणता मम जीवनवल्लरी
ह्यु पवने पवनेरितपल्लवा ।।

पत्र– पुष्प– फल– तोयतो यतो
वल्लरीति विहिता समर्चना ।
सूरिषु च्युतिपथे क्षमा ततः
प्रार्थना भरतराजपन्ततः ।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

च्युतयो बहव : सन्तु बालानामिव भाषिते ।
सूरयः साधु मन्यन्ते वात्सल्ये रसिका इव ॥

अन्ततोऽहं रुद्रराजपुरस्कारेण कृतार्थयन्तं समितिविशेषं विशेषतो मुक्तिपुरस्कारेण सभाजयन्तं सीतारामसाहित्यिकप्रतिष्ठानं साध्यक्षं ससदस्यं सबहुमानं कृतकृत्यतां प्रकटयितुं कामये । तथैव साहित्यिकपत्रकार-सङ्घ-गुणराजस्मारकसमिति-प्रभृतयश्च कृतज्ञतया सभाजनीयाः । तथा वृद्धप्रपितामहानुजस्य सुकृतिदत्तपन्तस्य कार्तवीर्योदयमहाकाव्यस्य प्रकाशनार्थं प्रयतद्भ्यो विशिष्टाऽऽत्मीयतामापन्नेभ्यः स्वामिप्रपन्नाचार्यमहाभागेभ्यो विद्यावारिधिभ्यो वाग्विभूषणेन भूषयद्भ्यः सबहुमानकृतज्ञतया सभाजये यैरहं साग्रहमस्य प्रकाशने बहुश : प्रेरितश्च ।

पुनश्च पदवाक्यप्रमाणज्ञेभ्यः प्रवचनपटुभ्यः केशवशरणपदाञ्चित-खेमराजमहोदयेभ्यश्च साधुवादप्रदानेन सप्रश्रयं कृतज्ञतां व्यञ्जये । तथा चान्ते लुषमुद्रणालयाधिकारिणं मुद्राराक्षसवशीकरणचाणक्यायितं प्रियमनुजं पौडेल-रुक्मनाथं च धन्यतमं मन्ये ।

इत्यलमतिविस्तरेण ।

इन्दुबाणनखान्विते वैक्रमे — भरतराजः पन्तः
आषाढैकत्रिंशत्तमे गङ्गासप्तम्यां स्वकीयजन्मदिवसे ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पितामह लेपटेन कविवरलक्ष्मीदत्तपन्त 'इन्दु'

(१९२२–१९६२)

इन्दोर्यस्य प्रकाशेऽस्मिन् खद्योतद्योतितायितः ।
मदीयोऽपि प्रयासोऽयं तस्मिन्नेव समर्पितः ॥

– पौत्रः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

माङ्गलिकानि

शारदा

सपुस्तकभुजाम्बुजा हरविरिञ्चिविष्णुस्तुता
प्रलम्बपरिवादिनी मधुरमूर्च्छनानादिनी ।
सता सुरसरस्वतीसरणिसाधिता साधिता-
मलं हरतु तारिणी हृदयहारिणी शारदा ।।

सच्चिदानन्दः

अभीक्ष्णमात्मन्यवभासितं सतं
महोज्ज्वलं शान्तमुपाधिवर्जितम् ।
निरञ्जनं वाङ्मनसोऽप्यगोचरं
तमप्रमेयं कलये परात्परम् ।।

जितेन्द्रियाश्वैः श्रुतपारदृश्वभि-
स्तृणाय मत्वा भवभोगवासनाम् ।
धृतं कथञ्चिन्मनसा मनीषिभि-
श्चितं तमेवाकलये सदा-लये ।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

न निर्वृतिर्मे धनगेहबन्धुभि-
र्न चापि तृप्तिर्विषयैर्विषोपमैः ।
अनन्तमात्यन्तिकशान्तये परं
भजे तमानन्दमयं सुखालयम् ॥

न चापि वाचा कथनीयमक्षरं
न चेतसा संग्रहणीयमच्युतम् ।
कथा क्व कायस्य विनाशधर्मणो
गुणेन गौरं गुणवर्जितं श्रये ॥

विरिञ्चिनारायणशङ्करात्मभि-
र्वपुर्विशेषैस्त्रिगुणावभासितैः ।
विधाय सर्गस्थितिनाशनं शनै-
स्तनोतु चैतन्यमयीं धियं विभुः ॥

गणनाथः

गणनाथ ! महेशनन्दन ! विपदुद्धारक ! विघ्नभञ्जन !
मयि मन्दमतौ कृपावता भवता मङ्गलमेव दीयताम् ॥
उदरम्भरणातुरस्य मे भव लम्बोदर ! वाञ्छितप्रदः ।
त्वदृते कतमोऽधुना भवेदवलम्बो दरसंकुले भवे ॥
परिवारित ऋद्धिसिद्धिभिः कृतसिन्दूरविलेपनः सुधीः ।
करुणावरुणालयायितो गणनाथः शरणं सदा मम ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शरणं मम कुञ्जरावनः शरणं सात्त्विकमोदकप्रियः ।
विदधातु सदाऽऽखुवाहनः करुणापूर्णविलोकनं मयि ॥

भास्करः

मोहं शुचं च परिहृत्य रथाङ्गनाम्नां
सम्मीलनं विघटयन्नलिनीवनानाम् ।
संयच्छतीव किरणैररुणैः सहस्रैः
संदृश्यमानभुवनेष्वनुरक्तवत्त्वम् ॥

उद्भासितानि महसा सहसा वनानि
नोद्भासितानि गिरिगह्वरकाननानि ।
संलक्ष्यतेऽद्भुतमिदं तिमिरावसाने
घस्रानने नभसि भास्वति दीप्यमाने ॥

प्राप्नोति यद्विकचतामपि पङ्कजातं
पङ्कं विशोष्य परितोष्य मिलिन्दवृन्दम् ।
एतस्य विस्मयपदस्य निवारणाय
पङ्कापनोदकुशलस्य रवेः कृतित्वम् ॥

उद्भासयन् भुवनमण्डलमंशुजालै-
र्नैशं निपीय तिमिरं नयनावरोधम् ।
अस्तोदयादनुदिनं युगकल्पकारी
मच्चेतसस्तरणिरस्तु तमोपहारी ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शङ्करः

आदिशक्तिः परा सैव दाक्षायणी
पार्वती, शैलपुत्री, महाकालिका ।
आदिशक्त्या तयैवार्धनारीश्वरः
स्पष्टशृङ्गारिकः सिद्धयोगीश्वरः ॥

सम्पदामाश्रयो भिक्षुकः शङ्करः
कृत्तिवासा वृषो वाहनं सुन्दरः ।
शूलयुक्तः सदा रोगमुक्तः सुखी
नैव निर्णीयते शाम्भवं वैभवम् ॥

पीतहालाहलः सैव मृत्युञ्जयो
यज्ञहृद्यज्ञकृद्यज्ञजिद्यज्ञभुक् ।
पन्नगैर्भूषितो गङ्गया शोभित-
स्ताण्डवी पाण्डवाराधितः शङ्करः ॥

आशुतोषः सदा वल्लभो योगिनां
चन्द्रसूर्यानलैर्लोचनैरञ्चितः ।
मन्मथं मीलयन्नीप्सितं पूरयन्
चेतसि द्योततां शङ्करः शङ्करः ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कृष्णः

नखावलिच्छिन्नरिपूदराय
चराचरापायितनूदराय ।
वृन्दारकाधीशसहोदराय
नमो नमस्ते रशनोदराय ।।

वेणुस्वनापूरितकन्दराय
वपुःश्रिया मन्मथसुन्दराय ।
पदम्बुजानम्रपुरन्दराय
भूयो नमस्ते दरहृद्दराय ।।

भुवि कलिन्दभुवश्चिरसञ्चितं
व्रजवधूकुचकुङ्कुमचर्चितम् ।
मुनिवरैरनिशं मनसार्चितं
कलय चित्त ! चिरं चरितं चितम् ।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कृताऽभ्यासाः समस्यापूर्तयः

न रोचते चन्द्रकला-विलासः

दारिद्र्य-दावानल-दूषितानां
न शोभते काम-कला-विलासः ।
यथा प्रदोषेऽपि रथाङ्गनाम्नां
न रोचते चन्द्रकला-विलासः ।।

नकारोऽलङ्कारो भवति मुखचन्द्रे मृगदृशः

चमत्कारः प्रादुर्भवति नयनाम्भोरुहजले
प्रहारो वाचां वा प्रणयपरुषो यच्छति मुदम् ।
विकारो नैवाऽयं मदन-मदिरा-मत्त-मनसो-
र्नकारोऽलङ्कारो भवति मुखचन्द्रे मृगदृशः ।।

सेयं शरच्छोभते

शस्यानां स्तवकैः स्तनोन्नतिनता स्मेराननाम्भोरुहै-
र्वस्त्रैरप्यवगुण्ठिता हरितया कान्त्या शुकाङ्गोपमैः ।
नक्षत्रैः समलङ्कृता पुनरीयं पङ्कादिशून्यै रसै
रम्यं जीवनपद्धतिं कलयती सेयं शरच्छोभते ।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

समस्याष्टकम्

क्वचित् प्राज्यं भोज्यं क्वचिदपि बुभुक्षातिविषमा
क्वचिद्धाहाकारः क्वचिदपि महोत्साहमहिमा ।
क्वचिच्छय्या रम्या क्वचिदपि पलालस्य शयनं
न जाने संसारः किममृतमयः किं विषमयः ।।

बुधाः केचित् केचित् सदयहृदयाः सन्तु कवयः
शठानामाधिक्यं परकदनमात्रैकमनसाम् ।
दुरन्तोऽयं कालः किमु विषमविज्ञानसमयो
न जाने संसारः किममृतमयः किं विषमयः ।।

कलापः कन्यानां क्वचिदपि सुतानां कुचरितं
क्वचिन्निःसन्तानः क्वचिदपि च सन्तानबहुलः ।
क्वचिद्वेश्या मत्ता क्वचिदपि विविग्ना कुलवधू-
र्न जाने संसारः किममृतमयः किं विषमयः ।।

पुरन्ध्रीणां लास्यं लसति विधवास्यं मलिनितं
क्वचिच्छुष्को बालः क्वचिदपि पयःपीवरतनुः ।
क्वचिद्विद्युद्दीपः क्वचिदपि तमिस्रातिनिविडा
न जाने संसारः किममृतमयः किं विषमयः ।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

क्वचिद्वक्ता श्रोता क्वचिदपि च चिन्तापरिहतौ
मिलिन्दाः पद्मेषु क्वचिदपि विसर्पन्ति मशकाः ।
सुधापानं किञ्चिद्बहुतरसुरापानमधुना
न जाने संसारः किममृतमयः किं विषमयः ।।

विवाहादेस्तूर्यं क्वचिदपि तु मृत्योः कलकलः
क्वचिच्चेच्छृङ्गारी क्वचिदपि शवाङ्गारमलिनः ।
क्वचिद्योगी वक्ता क्वचिदपि वियोगी विलपितं
न जाने संसारः किममृतमयः किं विषमयः ।।

इतो भेरीनादः प्रसरति ततः क्रन्दनरवो
हसन्तो गायन्तः क्वचिदपि रुदन्तः प्रतिपलम् ।
क्वचिद्घृष्टः पुष्टः क्वचिदपि गदाक्षेपगलितो
न जाने संसारः किममृतमयः किं विषमयः ।।

चलच्चित्रं चित्रं परिलसति लोकस्य परितः
शशिस्पर्शी कश्चिन्नभसि ननु विज्ञानसचिवः ।
शनैर्यातः कश्चित्तुहिनततितुङ्गे शिखरिणि
न जाने संसारः किममृतमयः किं विषमयः ।।

जयतु संस्कृतम् वि. सं. २०१७ वैशाख
वर्ष १ अङ्क १

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गम्यताम् !

गम्यताम् सखे ! गम्यताम्, नाऽत्र क्षणं स्थीयताम् ।

नाऽत्र वहन्ति तादृशाः श्रमभञ्जनाः प्रभञ्जनाः
सन्ति केवलं मनस्विमनःकम्पनाः प्रकम्पनाः

न सन्ति मन्दानिलवीजिता लता
विस्फुरन्ति परस्परं परं परुषा विरोधविषवीरुधः

नाह्लादयति शशाङ्करेखा रेखामात्रमपि
लेखा लेखाभारत्यां न मनागपि पठ्यन्ते ।

लसन्ति सुरभिसम्पादिताः सुरभयः कुसुमराजयः
परमस्ति सारग्राहिणां मिलिन्दानामेव पराजयः ।

हन्त ! न विलसन्ति सन्तः सन्तप्ता विश्वसन्तापे
कियच्चिरमस्मिन् सम्मानविरहिते स्थातव्यम् ।

गन्तव्यमस्ति चेद् द्रुततरमेव सुदृढनिश्चयमेव
विशालविश्वस्य विस्तीर्णसरणौ चरणौ निधातव्यौ ।

किन्तया चिन्तया सोच्छ्वासश्वसितेन वा
धीरतावलम्बनपुरःसरं ज्वाल्यतामात्मबलम् ।

क्षणमात्रमपि नाऽत्र स्थीयताम् गम्यताम् सखे ! गम्यताम् ॥

जयतु संस्कृतम्, वि. सं. २०१७ श्रावण

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

समस्यात्रयम्

अभ्यासार्जितशास्त्रसाररसिकैस्तत्त्वार्थपारङ्गतै-
विद्वत्संसदि लब्धकीर्तिभिरलं प्राज्ञैर्विदामुत्तमैः ।
किञ्चित्स्वल्पतरं पठन्नपि नरो यद्गर्वविस्फूर्जितः
स्पर्धन्ते हरिणाऽपि हन्त ! हरिणाः कोऽयं विधेः प्रक्रमः ।।

सर्वं येन निरन्तरं सुकवितामग्नेन नीतं वयः
काव्येन्दोः सुषमामयेन यशसा श्वेतीकृतं विष्टपम् ।
तं चैते परकाव्यचौर्यचतुरा गर्जन्ति चेद्धेलया
स्पर्धन्ते हरिणाऽपि हन्त ! हरिणाः कोऽयं विधेः प्रक्रमः ।।

निःश्वासो वदने, गतौ शिथिलता, नैवास्ति देहे बलं
मांसं निष्कुसितं, वपुः कवलितं, पीतं नवं शोणितम् ।
प्राणेष्वेव हि संशयश्चलदृशा पश्यन्ति चेदाननं
स्पर्धन्ते हरिणाऽपि हन्त ! हरिणाः कोऽयं विधेः प्रक्रमः ।।

जयतु संस्कृतम्, वि. सं. २०१७ आश्विन

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अयं नेपालः, वयं नैपालकाः*

किरीट एष मस्तके विराजते हिमालयो
विशालबाहुतां गते च यस्य मेचिकालिके ।
विचित्रवस्त्रवेष्टितो लताप्रसूनकाननै-
र्नदीभिरेष शोभितः कटिप्रदेशबन्धनैः ।।

अनन्तदेवमन्दिरैः पवित्रतीर्थपङ्क्तिभि-
श्चिरन्तनैः स्थिरैः शुभैरनेकधर्मकर्मभिः ।
नृपैः प्रजाहिते रतैः सदा नयेन पालितः
सदा नृपानुशासनानुगप्रजाभिरेधितः ।।

---

* 'नेपाल' इत्यस्य वृद्धत्वेऽपि 'रोपधेतोः प्राचाम् (पा. सू. ४।२।१२३)' इति वुञ् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

धराधरेन्द्रकन्धरान्महाप्रवाहवाहिनी-
स्तरङ्गरिङ्गणैः सदा वहन्ति यत्तरङ्गिणीः ।
सदा लये हिमालये सदाशिवः सदालयो
विराजते च यद्वनेषु गुञ्जनैः सदालयः ।।

उपत्यकासु कन्दरासु निम्नगासु वीचिषु
गिरिद्रुमेषु वल्लरीषु चौषधीषु यत्कथाः ।
गृहे गृहे जने जने गिरां श्रुतेः पथं गता
यदाकराः सुखाकराः सुवर्णरौप्यभास्वराः ।।

सदाश्रमे सदा श्रमे श्रमेण जीविकापराः
परार्थतः पराङ्मुखाः कृषीवलाः कृषिप्रियाः ।
न विस्मरन्ति संस्कृतिं परोपकारसत्कृतिं
यदुन्नतौ परायणाः सदा वितृष्णचेतसः ।।

रणाङ्गणे प्रणे स्थिराः कृपाणपाणयः सदा
विपक्षपक्षमग्रतो विधाय कृत्यमुद्यताः ।
निकृत्तकन्धरोच्छलत्प्रबालशोणशोणिता
विभूषयन्ति विष्टपं सुधांशुमूर्तिकीर्तिभिः ।।

विधान–वाद–तत्त्व–शास्त्र–तन्त्र–यन्त्र–नीतिषु
विचार–तर्क–भाष्य–भाव–काव्य–बन्ध–गीतिषु ।
सुशिक्षिताश्च दीक्षिताश्च कर्ममर्मपारगा
न सन्ति नैव यद्भुवा विलक्षणा विचक्षणाः ।।

जयतु संस्कृतम्, वि. सं. २०१८ वैशाख

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रावृड्शोभा

माहेन्द्रीयं दृष्टिपथं याति जनानां
हर्षोल्लासः क्षेत्रधनानां हृदयानाम् ।
वृष्टिर्विरां ग्रीष्मविनाशः सरसत्वं
लोको गच्छन्नस्ति शनैरुन्नतिलक्ष्यम् ।।

माहेन्द्रीयं कार्मुकशोभा जलदानां
ज्ञात्वा श्रुत्वा स्निग्धगभीरं स्तनितानाम् ।
शैले तुङ्गे शान्तिसमीरेरितपुंखो
लास्यं कुर्वन्नस्ति मनोमत्तमयूरः ।।

जयतु संस्कृतम्, वि. सं. २०१८ आषाढ
पूर्णाङ्क संख्या ९

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

चकोरचतुष्टयम्

त्वमेव मम चन्द्रिके ! नयनगोचरा शारदा
स्थिती तव विराजते नवसुधोज्ज्वलं भूतलम् ।
अमानिशि च तारकाः परिलसन्ति न त्वं तदा
त्वदीयमृदुकल्पना मनसि नित्यमुज्जृम्भते ।।

'कुहू' वदति कोकिलो मम विरोधमुन्निद्रयन्
स एव शिशिरागमे किमिति मौनमासेवते ।
वसन्तसमयेऽप्यहं तव तथाविधोपासको
यथास्ति दयितेऽधुना नवसमागमस्योत्सवः ।।

अहं भुवि समुत्सुको वियति चन्द्रिके ! त्वं स्थिता
चकास्ति न तु दूरता प्रणयिनोरिवाभ्यन्तरे ।
तथापि जलदागमे शृणु ! रथाङ्गनाम्नां यथा
दशा मम दशाऽभवन्नहह ! कष्टदा व्यञ्जना ।।

सखा कुमुद एष ते समकथो विपत्सम्पद-
श्चलत्तिमितिमिङ्गिलस्तव परं सुहृत्सागरः ।
तथैव कवयश्च ते स्तवविधानपारङ्गता-
स्तवास्मि दयितेऽधुना शरणमागतः पाल्यताम् ।

जयतु संस्कृतम्, वि. सं. २०१८ कार्तिक
पूर्णाङ्क संख्या ११–१२

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कोकिलप्रश्नाः

कोऽयं कालः का च देशस्य नीतिः
के चास्माकं पूर्वजाः संस्कृतिः का ।
देशः कोऽयं धार्मिको नास्तिको वा
तर्कैः शून्यः पण्डितो नास्ति को वा ॥

नित्यं चित्ते वित्तवृद्धेर्दुराशा
दानं, त्यागः शब्दकोषे निमग्नः ।
नग्नं वैरं सर्वदा दीपितस्य
सावद्या वा तस्य विद्याऽनवद्या ॥

किं वाध्यात्मं भौतिकं सर्वमान्यं
का वा युक्तिः सर्वथा शान्तये स्यात् ।
कः सिद्धान्तः शिक्षितैराश्रितव्यः
शिक्षा दीक्षा कीदृशी वा विधेया ॥

प्रश्नानेतान् कोकिलश्चूतवृक्षे
दृष्ट्वा काकं क्रूरशब्दं भ्रमन्तम् ।
औत्सुक्याद्वा स्पर्धया पृच्छति स्म
देयं तस्मै स्वोत्तरं किं विचार्य ॥

जयतु संस्कृतम्, वि. सं. २०१८ पौष पूर्णाङ्क २१

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

धिङ् नः पाण्डित्यम्

भाले भस्मत्रिपुण्ड्रं विलसति तिलकं चन्दनं वैष्णवीयं
पाश्चात्त्यापेक्षयैवं न वपुषि विहितं मण्डनं मुण्डनाद्यैः ।
प्राचामाचारवाचा न तु मनसि मुखे केवलं राष्ट्रवादः
किं नेपथ्यादिमात्रैर्भवति मुखरितः संस्कृतेः सिंहनादः ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पाण्डित्यं चाद्वितीयं बहुजनविदितं, भाषणं सारगर्भं
लेखाश्चौचित्ययुक्ताः प्रथितमपि पदं राजसम्माननीयम् ।
आचार्यः काव्यतीर्थः प्रभृति च पदकैर्भूषितं भारमात्रं
स्वार्थैं गर्वैरखर्वैः कथमतिकलुषैः संस्कृतं पालनीयम् ।।

आत्मानं सर्वशास्त्रोदधिपरिमथने मन्दरं मन्यमाना
भूयांसः सन्ति सन्तोऽप्यहह, हतरुचः स्वार्थवह्नेः शिखाभिः ।
मर्यादा–चाटुचर्या–सकलपरिचितास्त्यागकृत्या कदर्याः
के यूयं धूर्तवर्याः प्रविशत गहनं नाऽत्र युष्मत्सपर्या ।।

यद्यस्माकं शरीरे प्रवहति रुधिरं, चेद्वयं संस्कृतज्ञा
द्रव्याणां सञ्चयश्चेद्यदि च वयमहो ! देववाणीकृतज्ञाः ।
दीक्षा–शिक्षा–प्रचारैर्नयविनययुतैस्त्यागभिक्षादिकृत्यै-
र्वाचा कायेन बुद्ध्याऽऽमरणमनुदिनं संस्कृतं रक्षितं स्यात् ।।

कोऽहं, शक्तिः शरीरे स्फुरति च मम का किञ्च कर्तव्यमस्मिन्
विद्याऽधीता च का वा पतनमथ भवेदुन्नतिः कैरुपायैः ।
एकस्मिन्नस्ति तर्कः कठिनतमदशं जीवितोद्देश्यमन्यद्
धिङ् मानुष्यं धिगेषा जनिरपि शतशो धिक् च पाण्डित्यमन्यम् ।।

जयतु संस्कृतम्, वि. सं. २०१९ वैशाख–ज्येष्ठ
पूर्णाङ्क संख्या १३–१४

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अन्योक्तियुगलम्

तावत्कोकिल ! मौनतां कलय रे ! सर्वेऽधुना मानवा
निन्दन्तस्तव काकलीकलकलं काके विमोहं गताः ।
खिन्नास्तत्परुषोक्तिभिस्तव गुणैराकृष्टचित्ताः पुन-
र्नैवायान्ति रसाद्रसालविपिने यावद्वसन्तोदयम् ॥

तावत्तिष्ठ मिलिन्द ! मञ्जुलतमं स्वं गुञ्जितं मीलयन्
मण्डूको यदि पल्वलेऽस्ति विरुतौ कार्कश्यमापादयन् ।
आस्ते वा कति वासराणि ? नियतिर्नैकाकृतिः श्रूयते
नोन्मीलन्नलिनीवनस्मितमुखो यावच्छरच्छोभते ॥

जयतु संस्कृतम्, वि. सं. २०१९ कार्तिक
पूर्णाङ्क संख्या १९

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

समस्यायुगलम्

कासारे मलिनीकृता कमलिनी, विद्राविताः षट्पदा
आसारेण हिमाम्भसामपि जना जाड्ये त्वया पातिताः ।
खर्वत्वं गमितान्यहानि विहिता, रात्रिर्भृशं पीवरा
लोके चञ्चलतां वृथा प्रकटयन् 'हेमन्त मन्तुर्न ते' ।।

का वार्ता कुसुमस्य पल्लवलवोऽप्यस्तंगतो भूरूहां
काकानां परुषै रुतैः पिककलालापः पराभूयते ।
नीहारेण दिगङ्गनास्मितरुचिर्व्याप्ता निशान्तेऽप्यहो !
भास्वान् निर्धनतां गतः कथय रे ! 'हेमन्त मन्तुर्न ते' ।।

जयतु संस्कृतम्, वि. सं. २०१९ माघ
पूर्णाङ्क संख्या २२

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

देशभक्तान् प्रति

विलासहृतचेतसः कनककामिनीसेविनः
प्रजोन्नति-पराङ्मुखान् प्रगतिपद्धतेः कण्टकान् ।
विलोक्य बलदुर्मदान् भुवि पुराभवाञ्शासकान्
निरन्तरविरोधिनी जयति साऽऽकृतिर्वीरता ।।

श्रुतं तदपि निर्भयाः कटुरवं भुशुण्डीभवं
विदीर्ण-हृदय-स्रवद्-रुधिर-पङ्किलं भूतलम् ।
विहाय सुहृदः प्रियान् गृहजनानसून् हेलया
स्वतन्त्रदृढनिश्चया हृदि गताः कथाशेषताम् ।।

त एव नयपालजा अपि स एव देशोऽप्ययं
स्वतन्त्रफलभोगिनः स्मरणमात्रसारा वयम् ।
किमस्ति वचनेन वा कवितयाऽपि तेषां कृते
यदीय-यशसोज्ज्वलं जगदिदं स्फुटं शोभते ।।

जयतु संस्कृतम्, वि. सं. २०१९ चैत्र
पूर्णाङ्क संख्या २४

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अनेकतायामेकता*

अयं पशुपतिर्गिरेर्हिमवतः स्थली भूरियं
गता रुचिविचित्रतामपि च हिन्दवः साम्प्रतम् ।
विधाननिगमागमैरनुभवैश्च भिन्नायिताः
परंपदसमीहया चरमलक्ष्यमेकं परम् ।।

मतिः प्रतिशिरः पृथक्, प्रतिसरः पृथक् पुष्करं
पृथक् प्रचलनादिकं जनपदेषु संश्रूयते ।
पृथक् प्रतिमुखं वचो जगदिदं पृथक्त्वं गत
विभिन्नपथतो यथा जलनिधौ जलं गाहते ।।

श्रुतौ श्रुतिपरम्परा, स्मृतिपथे स्मृतिः केवला
विचित्रधिषणावशादपि विचित्रिता धारणा ।
मनो हरति सत्कवे रतिमनोहरा भारती
समाश्रयति तत्त्वतश्चरमलक्ष्यमेकं परम् ।।

---

* २०४४ माघ १४ मितेऽह्नि 'विश्व-हिन्दु-संघ'स्यानुरोधाद् हिन्दूसम्मेलने वाचनार्थं लिखितम् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शैशिरमन्योक्तिपञ्चकम्

रविम्–

बहुवसुरपि कस्मान्मन्दतेजा विवस्वान् !
कथमिव बत ! यातो विप्रवद्दक्षिणाऽऽशाम् ।
यदि मनसि दुराशा चक्रवद् भ्राम्यमाणा
परिषदि त्रिवुधानामिष्टसिद्धिः कथं ते ?

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शशिनम्–

द्विजपतिरपि कस्मादद्य सार्थो हिमांशुः
शरदि कुमुदबन्धुर्बन्धुतुल्यो जनानाम् ।
तुदति हिमकलाभिर्मर्मवाक्योपमाभिः
शकलयति च गात्रं प्रेमपात्रं कथं स्यात् ?

समीरम्–

अनुचितमिदमीदृक् साहसं ते समीर !
प्रथयति भुवनेऽस्मिन् यज्जगत्प्राण ! रक्षाम् ।
जड इव जडयोगाज्जाड्यबाधामिदानीं
विरचयसि वितन्वन् सार्थतामाशुगत्वम् ।।

सलिलम्–

स्थिरचरजनिभाजां सर्वदा जीवनं त्वं
किमिति शिशिरसङ्गाच्छीततां वर्द्धयित्वा ।
त्वदभिमुखमुपेतान् स्नातुमिच्छन् कबन्ध !
व्यथयसि सितधारैः किं कबन्धान् करोषि ?

वसुमतीम्–

वसुमति ! कथय त्वं शाद्वलोत्सङ्गमस्मिन्
मृदुलमपि नितान्तं मीलितं व्यञ्जयित्वा ।
सुखयसि न किमेतान् कृष्णवर्त्मान्तिकस्थान्
न हि भवति कुमाता जायते वा कुपुत्रः ।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

संस्कृतम्

न पाठयन्ति संस्कृतं, न लेखयन्ति संस्कृतं
न वाचयन्ति संस्कृतं न साधयन्ति संस्कृतम् ।
न रञ्जयन्ति संस्कृतं परं हसन्ति संस्कृतं
न भूषयन्ति संस्कृतं विदूषयन्ति संस्कृतम् ।।

न भौतिकं, न चात्मिकं, न चार्थिकं, न नैतिकं
समुद्भवः समुन्नतेः कथं विहत्य संस्कृतम् ?
न शोभते, न राजते, न दीव्यते, न रोचते
समस्त-काव्य-बन्धनं परं विहाय संस्कृतम् ।।

न विश्वसन्ति संस्कृतं, न संस्मरन्ति संस्कृतं
न रोचयन्ति संस्कृतं प्रतारयन्ति संस्कृतम् ।
वदन्ति संस्कृतं मृतं यदस्ति वस्तुतोऽमृतम्
कथं भवेद् विगर्दितं यदस्ति सारगर्भितम् ।।

अनादिवेदवाङ्मयादनन्तकाव्यसागरे
पदे पदे रसावहं मनोज्ञभावभावितम् ।
विचार्य कार्यमुन्नतिः सदैव साधु शोच्यतां
कथं मृतं भवेदिदं युगान्तरेऽपि संस्कृतम् ।।

समस्तविश्वभाषिकानदीप्रवाहवाहिनी
नगाधिराजकूटतः पयोनिधौ पयस्विनी ।
स्तुवन्तु हेलयन्तु वा न याति जातु हीनतां
चिरन्तनाऽपि नूतना चकास्ति देवभारती ।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सामयिकता

व्यासोऽध्यासपरोऽपि नास्ति विषये
पातञ्जलं प्राञ्जलं
मीनत्वं वत ! जैमिनिश्च गतवान्
किं गौतमो गौतमः ।
सांख्योक्तौ कुशलोऽपि नास्ति कपिलः
काणः कणादोऽपि वा
किं भूयः कथनेन बोधविषयेऽ-
भूच्छङ्करः सङ्करः ।।

भासो भासा हताशो, व्रजति धनवतां
दासतां कालिदासो
नोत्कर्षं याति हर्षः कविकमलरवि-
र्भारविर्दीप्तिहीनः ।
बाणो बाणेन विद्धो, जड इव जडतां
याति माघेन माघो
वाल्मीकिश्चापि वल्मीकिततनुरधुना
कूर्दमाने कुकाव्ये ।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

क्षमापञ्चाशिका

अहो ! विधात्रा निजकर्मबन्धात्क्षिप्तस्य मातुर्जठरान्धकूपे ।
भग्नस्य चात्यन्तिकशान्तिमार्गान्मग्नस्य सांसारिकमोहसिन्धौ ।।
ममापराधं भगवन् क्षमस्व !

शकुन्तवत्पञ्जरितो जरायौ निष्क्रान्तुमुच्चेष्टति सूतिवायौ ।
प्रतिक्षणं निर्गतचेतनस्य भूमौ निपत्यापि विमोहितस्य ।।
ममापराधं भगवन् क्षमस्व !

क्रमात्समासादितशैशवस्य निरन्तरं स्तन्यपिपासितस्य
पुरीषमूत्रादिकवैतरण्यां निमज्य घोरं विलपन् स्थितस्य ।
ममापराधं भगवन् क्षमस्व !

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पिपीलिकाभिर्मशकैश्च दंशैर्निपीडितः स्वेदजमत्कुणाद्यैः ।
भृशं समुच्चालितपाणिपादं रोरूयमाणस्य रुजार्दितस्य ।।
ममापराधं भगवन् क्षमस्व !

नितान्तबाधव्यथया रुदन्तं लालाकुलं बालमजातदन्तम् ।
बुभुक्षितोसाविति पायितेन मर्माहतस्य प्रतिकूलकृत्यैः ।।
ममापराधं भगवन् क्षमस्व !

उत्तीर्य बाल्यं बहुदुःखभाजं कैशोरमासाद्य विनिःसृतस्य ।
आकारितस्यापि धिया जनन्या क्रीडा–प्रसक्तस्य रजःस्थितस्य ।।
ममापराधं भगवन् क्षमस्व !

समं वयस्यैरतिधावितेन क्रीडावशादाहतकोमलाङ्गः ।
क्षरन्नसृग्वाष्पसमाकुलाक्षः स्मरन् सवित्रीं गृहमागतस्य ।।
ममापराधं भगवन् क्षमस्व !

कैशोरमेतादृशचर्ययैव विलंघ्य तारुण्यमुपागतस्य ।
विलुप्तविद्यस्य चलन्मतित्वात्स्वैरं विहारं चरतः शठस्य ।।
ममापराधं भगवन् क्षमस्व !

दुर्वृत्तसङ्गान्न सुवृत्तसङ्गो न चापि कर्तव्यपथेऽनवद्यः ।
यथारुचं बाह्यचरैश्चरित्वा वयःस्थतामूढधियोऽबुधस्य ।।
ममापराधं भगवन् क्षमस्व !

सवारुणीनां तरुणीगणानां स्मरान्धकारस्य वशं गतानाम् ।
सङ्गेन सर्वोच्चसुखं विचिन्त्य विसृष्टविप्रोचितदैनिकस्य ।।
ममापराधं भगवन् क्षमस्व !

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रूढस्मयत्वात्पितृदैवतं नो न मातृदेवोऽतिथिदैवतं च ।
आचार्यदेवो न ततः परस्तान्निर्दैवतत्वादशुभायितस्य ।।
ममापराधं भगवन् क्षमस्व !

चाञ्चल्ययोगात्पठने न चित्तं विद्याविहीनस्य न चापि वित्तम् ।
हृतोऽप्यभावोऽस्ति ततोऽप्यभावः पशोरिवाज्ञानविलीनवृत्तेः ।।
ममापराधं भगवन् क्षमस्व !

गुरून् तिरस्कृत्य विशृङ्खलस्य निरस्तशास्त्राभ्यसनात्खलस्य ।
मण्डूकवत्कूपकषायवृत्तेरुच्चैः पदं गन्तुमलज्जितस्य ।।
ममापराधं भगवन् क्षमस्व !

कुरङ्गवद्गीतविमोहितस्य वशीकृतस्यान्तकलुब्धकेन ।
जगद्वने चागतयौवनेन प्रभ्रष्टमार्गस्य रजोन्धितस्य ।।
ममापराधं भगवान् क्षमस्व !

मातङ्गवन्मूढमतिः करेणौ विलुण्ठ्य नारीजनपादरेणौ ।
बद्धस्य मोहायसशृङ्खलाभिरितस्ततो रन्तुमसक्तवृत्तेः ।।
ममापराधं भगवान् क्षमस्व !

पतङ्गवद्रूपविकर्षितस्य हुताशनेऽपि ज्वलिते निपत्य ।
भस्मावशेषस्य शरीरवृत्त्या विदग्धबुद्धेश्च विनष्टदृष्टेः ।।
ममापराधं भगवन् क्षमस्व !

भृङ्गायितः सन् मकरन्दलुब्धः सायन्तनाम्भोरुहसंस्थितस्य ।
अस्तंगते भास्वति सान्ध्ययोगात्सम्मीलनाद्बन्धनमागतस्य ।।
ममापराधं भगवन् क्षमस्व !

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

आस्वादलोभाद्वडिशस्थमांसे जलस्थमीनायितविग्रहस्य ।
सुधीवरं यौवनतोऽप्यनर्थादजानतो वारिणि रुद्धवृत्तेः ।।
ममापराधं भगवन् क्षमस्व !

स्फुटं चलच्चित्रनिरीक्षितेन नृत्यन्नताङ्गीस्तनवल्गितेन ।
परस्परालिङ्गितचुम्बितैश्च हृदि प्रहृष्यन्मदनानलस्य ।।
ममापराधं भगवन् क्षमस्व !

द्यूते च मद्ये व्ययतः समाप्तौ नितान्तकार्षापणलम्पटस्य ।
सदा सदाचारपराङ्मुखस्य मात्सर्यमात्रैकमनोबलस्य ।।
ममापराधं भगवन् क्षमस्व !

प्रिया ममैषा शिशवो मदीया केनाऽप्युपायेन च पालनीया ।
विचिन्त्य चेत्थं भ्रमतो मुधैव वनाद्वनं वाऽथ गृहाद्गृहं वा ।।
ममापराधं भगवन् क्षमस्व !

प्रतारणं कारणहीनवैरं प्रकुर्वतो दारुणमारणं च ।
प्रतिक्षणं कोपकषायितस्य प्रगर्वतो रौद्रपथं गतस्य ।।
ममापराधं भगवन् क्षमस्व !

सुस्वादुभोक्ताऽस्म्यहमेक एव सुवस्त्रधारी सुगृहीति चोक्त्वा ।
सुरालयं स्वर्गसमं विचिन्त्य निरन्तरं चास्मितया युतस्य ।।
ममापराधं भगवन् क्षमस्व !

धृत्वा दुराशां मृगतृष्णयार्तः पराङ्मुखः सन् सदसद्विवेके ।
रसातलासादितगौरवस्य पैशुन्यदासत्वविकुण्ठितस्य ।।
ममापराधं भगवन् क्षमस्व !

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सूत्रे शिखायां क्रकचं प्रयुज्य विमृज्य टीकां निटिलाञ्चितां च।
दम्भादुपाध्यायपदब्रुवस्य पदे पदे वञ्चनदीक्षितस्य ।।
ममापराधं भगवन् क्षमस्व !

शास्त्रे विनष्टोऽपि जनः कविश्चेत् वृत्त्या विनष्टो जन एव नेता।
सर्वत्र नष्टे सति दस्युरेव दस्युप्रवृत्त्यैव निरंकुशस्य ।।
ममापराधं भगवन् क्षमस्व !

कुवृत्ततश्छन्दसि नैव शक्तिर्भावावबोधे जटिला प्रसक्तिः।
भाषा विशीर्णाऽथ पदा विकीर्णा लज्जां विनिर्जित्य जयोन्मुखस्य।।
ममापराधं भगवन् क्षमस्व !

न संस्कृते, व्याकरणे, न काव्ये, नालंकृतौ, नैव रसे ध्वनौ वा।
उक्तौ च भङ्गीयुतवक्रतायां ज्ञानेन शून्यस्य विडम्बितस्य ।।
ममापराधं भगवन् क्षमस्व !

भासः क्व यातः क्व च कालिदासः क्व भारविः कुत्र गतोऽस्ति माघः।
श्रीहर्षनामा विहगः कविर्वा सर्वान् तृणीकृत्य मृषोत्थितस्य ।।
ममापराधं भगवन् क्षमस्व !

अयं प्रजातन्त्र इति ब्रुवाणः पराङ्मुखः सज्जनजीवनेऽपि।
स्वार्थान्धतामेव समर्थकस्य समासतोऽर्थेषु निरर्थकस्य ।।
ममापराधं भगवन् क्षमस्व !

स्वाध्यायकृत्यं सकलं विहाय शून्योद्यमत्वाद् बहिरेव यातः।
विभिन्नसंस्थां सहयोगनाम्ना भिक्षामटित्वा कृतवञ्चनस्य ।।
ममापराधं भगवन् क्षमस्व !

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

'चिये'ति पीत्वा शयनीय एव समांसमीनं दिवसेऽपि भुक्त्वा ।
रात्रिश्च नीत्वा सुरया युवत्या मोहाद्दशां मोहतमां गतस्य ।।
ममापराधं भगवन् क्षमस्व !

सदैव षड्वर्गवशीकृतस्य दर्पेण दूरीकृतकौशलस्य ।
अनर्थतोऽर्थार्जनलालसस्य दुर्वृत्तवृत्तीः कृतसंग्रहस्य ।।
ममापराधं भगवन् क्षमस्व !

जना विषण्णा विरहे निषण्णा, महार्घता दैनिकभोज्यवर्गे ।
प्रवञ्चनेनैव गतोऽधिकारः स्वमर्दलं वादयतो यथास्वम् ।।
ममापराधं भगवन् क्षमस्व !

स्वतन्त्रतायामनुशासनस्य ह्रासस्तु नैसर्गिक एव लोके ।
इतीरयित्वा विषयं रटित्वा स्वैरं चरन् मर्कटचञ्चलस्य ।।
ममापराधं भगवन् क्षमस्व !

न संस्कृतौ धर्मपथेषु निष्ठा, समुन्नतिः का प्रगतिः कृतिः का ।
नेतृत्वमूलात् पदलोलुपत्वाद् वैदेशिकस्यानुकृतौ रतस्य ।।
ममापराधं भगवन् क्षमस्व !

घनैकगर्वात्पटहायितस्य परिश्रमाणामपि शोषकस्य ।
मन्यस्य चोत्कर्षमपि प्रतार्य स्वार्थैकपूर्तौ कृतभाषणस्य ।।
ममापराधं भगवन् क्षमस्व !

सर्वं पदं हस्तिपदे निमग्नं विद्या परीक्षाऽपि घने विलग्नम् ।
समुष्टिबन्धं घनमर्जयित्वा घनागमालम्बितगौरवस्य ।।
ममापराधं भगवन् क्षमस्व !

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कुलं पवित्रं, जननी कृतार्था, वसुन्धरा पुण्यवती धनेन ।
वृत्तेः कुवृत्तेः समतां गतस्य धनैषणोद्देश्यविजृम्भितस्य ।।
ममापराधं भगवन् क्षमस्व !

एतादृशैरर्थपरैर्विचारैरतन्द्रितोऽनर्थतरैर्विकारैः ।
कलत्रपुत्रैरपि वञ्चितस्य व्यर्थं समुल्लंघितयौवनस्य ।।
ममापराधं भगवन् क्षमस्व !

क्व मानवत्वं, क्व च वा पशुत्वं, क्व राष्ट्रसेवा क्व परोपकारः ।
क्व शास्त्रचिन्ता, क्व कृतिः क्व कार्यं पशोरिवास्तोन्मुखजीवनस्य ।।
ममापराधं भगवन् क्षमस्व !

गतं तिथेर्वासरतश्च पक्षाद् मासोऽयनं वर्षमिति प्रकारैः ।
निजायुषः शेषमपि प्रमादादजानतो जीर्णवयःस्थितस्य ।।
ममापराधं भगवन् क्षमस्व !

न नेत्रशक्तिर्न च कर्णशक्तिर्गन्धस्य शक्तिर्न च नासिकायाम् ।
न पाकशक्तिर्जठरानलस्य शक्त्या निवृत्तेन्द्रियवैभवस्य ।।
ममापराधं भगवन् क्षमस्व !

क्रमेण सर्वे पतिताश्च दन्ताः काका वकत्वं गमिताश्च केशाः ।
प्रसाधयन् कृत्रिमसाधनेन वयः परावर्तयितुं रतस्य ।।
ममापराधं भगवन् क्षमस्व !

गता वयस्या वयसा समानाः कथावशेषं शयने शयानाः ।
मयापि गन्तव्यमवश्यमेवं विस्मृत्य वित्ताहरणोन्मुखस्य ।।
ममापराधं भगवन् क्षमस्व !

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गात्रं संकम्पं, त्रिवली कपोले, समर्थतावर्जितपाणिपादम् ।
तथापि नायाति धने विरक्तिर्दीपस्य निर्वाणपथं गतस्य ।।
ममापराधं भगवन् क्षमस्व !

कासादिभिर्घुर्घुरितं च कण्ठं, रुचिर्न भोज्येऽपि न चास्ति निद्रा ।
कष्टाद् दशा कष्टतरा तथापि जिजीविषो भेषजसंग्रहाद्यैः ।।
ममापराधं भगवन् क्षमस्व !

इतो विनष्टः परतोऽपि नष्टो मितं च सारं वचनं विचिन्त्य ।
निश्चिन्तितत्वाभ्यसनेऽसमर्थो दण्डं गृहीत्वा भ्रमणोत्सुकस्य ।।
ममापराधं भगवन् क्षमस्व !

वेदान्तवाक्यात्कुरु तत्त्वचिन्तां सेवस्व जीवस्य शिवत्वचिन्ताम् ।
वैराग्यवृत्त्या त्यज मोहचिन्तां विस्मृत्य सर्वं स्मरतोऽर्धचिन्ताम् ।।
ममापराधं भगवन् क्षमस्व !

दारा न पुत्रा मरणे शरण्या भूयात् पुरारिः शरणं मुरारिः ।
एवं न संचिन्त्य सतृष्णचेतश्चाञ्चल्यसञ्चोदितमानसस्य ।।
ममापराधं भगवन् क्षमस्व !

स्वनामधन्यः कविकालिदासो
यस्य प्रसिद्धो भुवि वाग्विलासः ।
तदंशतः पूरयतः समस्यां
पञ्चाशिकां संमदमाश्रितस्य ।।
ममापराधं भगवन् क्षमस्व !

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पत्राणाम् उत्तराणि*

[१]

प्रणिपातपुरःसरा मया नववर्षे शुभकामना कृता ।
भवतापि ममापि पठ्यतां बहुदोषार्धसमा पदावलिः ।।

किमुत स्मरणे चिरायितं किमु पत्रानयने विलम्बितम् ।
इति संशयमूलमच्छिनत् करपत्रोपमपत्रमुद्रिका ।।

कृतकृत्यतरोऽस्मि साम्प्रतं चिरचिन्तातुरमानसोऽप्यहम् ।
बहुधा कथयामि किं पुनर्भवदग्रे शिशुतामुपागतः ।।

वयसा तपसा गुणोत्करैरपि वृद्धो मदपेक्षया भवान् ।
रचना न ममास्ति तादृशी रसपूर्णा भवतोऽस्ति यादृशी ।।

मम लोचनगोचरं गतस्तमसा रुद्धगतेरिवारुणः ।
अधिरोहति हन्त ! विस्मृतिं कथयत्यन्तगुणालयो भवान् ।।

भवतः प्रतिभाप्रभावतो हृदि हर्षोऽस्ति यथा ममाधुना ।
सलिलेऽपि तथा महोदधेर्न शरच्चन्द्रमरीचिसङ्गमात् ।।

---

* मोलानाथपराजुली–माधवप्रसाददेवकोटा–हेमचन्द्रपोखरेलमहोदयैः प्रेषितानां पत्राणाम् उत्तराण्यत्र प्रस्तूयन्ते । तानि च पत्राणि परिशिष्टे प्रस्तुतानि ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सततं शुभकामनाजुषो जगदीशो वितनोतु मङ्गलम् :
भवतो विदितैव सा पुरा मदवस्था कुशली तथाऽप्यहम् ।।

समुपेत्य विमानवर्त्मना त्वरितं सौख्यमयं निजालयम् ।
परितः परिवारवेष्टितो ज्वलितान्तःकरणः कथं भवान् !

तरणे कृतरूपकं वचो भवताऽऽचार्यपरीक्षणोदधेः ।
परिहासविजल्पितायते क्व हनूमान् क्व च मन्दधीरहम् ।।

न भवान् स्मृतिशक्तिविक्लवो न तथा कुण्ठितधीर्यथाऽस्म्यहम् ।
अधिको मदपेक्षया भृशं बहुभाग्यः सफलीभविष्यति ।।

भवतः प्रतिभाचमत्कृतेः सकलश्छात्रगणोऽतिविस्मितः ।
प्रशसंस मुदा मुहुर्मुहुः सशिरःकम्पमपूर्वकौशलम् ।।

शृणु मित्र सुखावहोऽस्ति मे रमणीयोऽपि न काष्ठमण्डपः ।
अतएव पुनः पुनर्भवाननुगृह्णातु सुधोपमैः पदैः ।।

तमसा परिपीतात्मा मित्र–दर्शनलालसः ।
पन्तो भरतराजाख्यः कामये शीघ्रमुत्तरम् ।।

(२०२० वैशाख २)

[२]

मया लब्धं पत्रं पुनरपि सुधाभं तव सखे !
सखेदत्वं व्यञ्जीकृतमपि वृथा तुच्छविषये ।
तृतीये वैशाखे चपलमनसा प्रेषितमहो !
स्मरंस्त्वत्सौजन्यं हृदयमिह धन्यं श्रयति मे ।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

द्वितीये वैशाखे स्मरणमयपत्रं शशिदिने
न जाने संत्यक्तं पुनरपि विलम्बः कथमभूत् ?
मिलिन्दत्वं यायात्तदपि भवतः पाणिकमले
पवित्रं सौहार्दं समुपचिततां यातु सततम् ।।

भवान् गेहं प्राप्तो निजमपि विमानेन मुदितो
मदीये चित्तेऽस्मिन् समजनि सखे ! मित्रविरहः ।
सजायापुत्रं त्वां दिशतु भगवान् मङ्गलतति
सदिच्छालेशात्ते कुशलमिव वर्ते प्रतिदिनम् ।।

इदानीमौदास्यं भजति मम चेतः प्रतिदिनं
परीक्षा साफल्यं वजति विफला वेति विषये ।
न शङ्का कर्तव्या भवति सफला ते परिणति-
स्त्वयाऽऽरोढुं शक्यस्त्वरितगतिनाऽऽचार्यशिखरः ।।

कियद् व्याजस्तुत्या परिहसति पत्रेष्वपि भवान्
पुनः प्रत्यक्षं स्याद् गतवति दिने किञ्चिदपि तत् ।
विवादेनैवाऽलं स्फुटयति भविष्यो यदि युगः
सशङ्को नष्टः स्यादिति च हरिणापि प्रकटितम् ।।

भवान् भूयोभूयः स्मरणसुधया पूर्णममलं
त्यजन् स्वं पत्रं मां सततमनुगृह्णातु विकलम् ।
महद्ध्वान्तव्याप्तं नगरमपि सौधोज्ज्वलमियं
न शक्यं लेखन्या प्रकटयितुमग्रे किमधिकम् ।।

(२०२० वैशाख ८)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सप्तदशे वैशाखे भवता सम्प्रेषितं पत्रम् ।
षड्विंशे पाणितलं पवित्रमकरोद् विलम्बितं तस्मात् ।।

विचित्रपदगुम्फितैस्तुलितमेघदूतं सखे !
निपीय कवितामृतं हृदि ममास्ति हर्षो यथा ।
तुषारकरमण्डलाच्चपललोचनैश्चन्द्रिकां
चिरं तृषितचेतसां न च चकोर यूनां तथा ।।

सखे ! मदधिकस्य ते प्रतिभया, गुणैर्विद्यया
सदा महिमशालितामुपगतस्य चाध्यापनात् ।
कलत्रतनयादिभिः परिवृतस्य सानन्दतां
समाकलयतः सुधीप्रवर ! कामये मङ्गलम् ।।

सदैव गृहिणी गृहे, विनयिनौ प्रियौ चात्मजौ
सुताऽध्ययनलालसा कथमिमे लभेरन् शिवम् ।
इति व्यथितमानसः सततमर्थचिन्तातुरो
ब्रवीमि भवतः पुरः कथमहं सखे ! कौशलम् ।।

सखे ! परिचितस्त्वया मम गृहं समागच्छता
मिथः प्रवचनैर्मुहुर्मुहुरहं स्मृतेर्गोचरः ।
यथास्ति भवदर्जनं तदधिकं ममाप्यर्जनं
दशामियमजानतां करुणया विना दुष्करम् ।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सखे ! मम न तादृशं किमपि वर्तते साधन
दुनोति हृदयं ततो वनलतेव दावानलैः ।
भवान् तदपि संशयं व्रजति का कथा मादृशां
मनो न रमते मनोहरतरै रुदन्तैर्नवैः ॥

हठात् कृतनिबन्धनं गुणरसैर्विहीनं त्वया
विलोक्य सकलं क्षमासहितमुत्तरं दीयताम् ।
पदैः सुमधुरैः सुधासमधुरैः समाकर्षितोऽ-
स्त्ययं स भवतः सखा भरतराजनामा जनः ॥

(२०२० वैशाख २७)

[४]

विपश्चिता मित्रवरेण संस्मृतं नभस्य शैवेऽहनि लोहिताक्षरम् ।
पवित्रपत्रं नवभावभूषितं समाजगामाऽद्य नभस्यषोडशे ॥
विरीक्ष्य पत्रं भवतः सखेऽधुना ममज्ज चित्तं मम संमदार्णवे ।
चिराय लब्धं भवदीयदर्शनं सुखाय सञ्जातमिवानुभूयते ॥
प्रसादपूर्णैर्नितरां स्फुटीकृतैर्मनोजभावैः सरसैः पदक्रमैः ।
पदे पदे मोदकरी शनैः शनैः कथं सखे ! विस्मृतिमेति भारती ?
तवैव नित्यं शुभकामन जुषः प्रभावतोऽहं कुशलीव साम्प्रतम् ।
भवन्तमत्यन्तनिरामयं शिवं तनोतु विश्वम्भरमूर्तिरीश्वरः ॥
विहाय पूर्वार्जितभूमिमाश्रमं सुखाय दृष्ट्वा यदि काष्ठमण्डपम् ।
ससम्भ्रमं ते हृदयं वृथा श्रमः सुखं तु तत्रैव विचारतो मम ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

हिमालयस्यौषधिभिर्निरामयः सुपोषितः सेवितगोरसादिभिः ।
विलसिता कामुकतापराङ्मुखः सुखी भव त्वं नगराच्छताधिकम् ॥

ममापि दैनन्दिनजीवनक्रमो गतावकाशोस्त्यधुना यथा तव ।
तथापि चिन्ता न मनागपि द्रुता महार्घखाद्यैरनिवार्यतां गता ॥

वितीर्णताऽऽचार्यपरीक्षणोदधेर्गतं शिशुक्रीडनकं यथा तथा ।
न पण्डितानां धुरि कीर्तिता वयं न संस्थिता मूढजनस्य संसदि ॥

परस्परं श्रेणिविलोकनेन किं प्रमाणपत्रग्रहणेन वापि किम् ?
न संस्कृतस्योन्नतये मनागपि स्पृहास्ति चित्ते यदि जीवनेन किम् ?

परोपकारेण न पावितं मनो न साधितं कीर्तिकरं परं तपः ।
विलासदासस्य जनस्य जीवनं पशोरिवाद्यास्ति विषादभाजनम् ॥

कुतो गतं मानवजन्मगौरवं विभूषिता नो जननी वसुन्धरा ।
यथार्थतां याति कदा मनुष्यता मनोविनोदो न वितृष्णतासमः ॥

सतां प्रसङ्गो न विना त्वया सखे ! सखेदतां याति मनो विलम्बने ।
प्रतीक्षतेऽजस्रसहस्रभावनासमुज्ज्वलां ते मधुरां पदावलीम् ॥

त्वदीयमावश्यकपुस्तकं च तद्विचार्य विद्वत्परिषद्विनिश्चितम् ।
यथा द्रुतं प्रेषयितुं समीहते कृतोद्यमं मे हृदयं दिने दिने ॥

चिरायितं माऽस्तु समुत्सुकाय मे तवोत्तरं प्रेषयतो मनागपि ।
त्रुटिश्च मे व्याकरणादिसम्भवा क्षमापथं यात्वधिकं किमुच्यते ॥

(२०२० भाद्र १७)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

[५]

ज्येष्ठस्य प्रथमे घस्रे प्रेषितं भवता सता ।
रम्यं पद्यमयं पत्रं पवित्रं पाणिमाययौ ।।

छन्दसाऽनुष्टुभेनापि व्यञ्जिता रमणीयता ।
सम्पदाम्बुधिमग्नोऽहं पठन् पत्रं मुहुर्मुहुः ।।

सदायादस्य ते क्षेमं तनोतु भगवान्भवः ।
कुशलीवास्म्यहं मित्र ! भ्रममाणो भवाटवीम् ।।

अभावादवकाशस्य न पत्रं प्रेषितं त्वया ।
केवलं स्मरणेनैव कृतार्थयितुमीहसे ।।

ग्राम्योऽप्यत्यन्तगुणवानधिको मदपेक्षया ।
कीदृशः कोकिलो ग्राम्यो नगरस्थोऽपि वायसः ।।

कोषो मम सकाशेऽस्ति प्रेषयिष्ये यथाद्रुतम् ।
रूप्यकाणां कृते मित्र ! क्षन्तव्या मेऽनुदारता ।।

गुरुणा रामनाथेन परामृष्टोऽस्मि भूरिशः ।
प्रमाणपत्रं मित्रार्थं प्रेषयस्वेति चोदितः ।।

राजधानीनिवासित्वाद् दौर्बल्यात्स्वास्थ्यविक्लवात् ।
द्रव्यसञ्चयशून्यत्वात्किं मयोपकृतं भवेत् ?

कदाचित्कवितां किञ्चिल्लेखन्या घर्षयन्नपि ।
स्वान्तःसुखं यशश्चैव शशशृङ्गायते मम ।।

वाणी, स्मितं च सौजन्यं, विद्वत्ता, प्रतिभा, गुणः ।
भवतो मित्र ! मच्चित्ते गगने तारकायते ।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कामये च भवतः पुनः पुन-
मित्रवर्य ! कविताऽवलोकनम् ।
प्रार्थये त्रुटिषु केवलां क्षमां
तावको भरतराजनामकः ।।

(२०२१ ज्येष्ठ १३)

[६]

मित्रवर्य ! भवता प्रहितं मे सत्वरं सुरगिरा स्मृतिपत्रम् ।
मङ्गले गुणमितेऽह्नि नभस्ये मङ्गलं प्रकटयन्नुपपेदे ।।

कामये सह सदा सुतदारैर्मङ्गलं तव वयस्य ! नितान्तम् ।
नित्यमेव शुभकामनया ते पर्यटामि कुशलीव सदाहम् ।।

आवयोः स्मृतिपथे चिरकालं जीवितं भवतु साप्तपदीनम् ।
भावना स्तुतिपदे गणनीया तावकीति नितरां मुदितोऽहम् ।।

प्रेषितं किमभवद्भवदर्थं तत्र विष्णुहरिणा बहुमूल्यम् ।
कोषपुस्तकमहो ! किमु नीतं किं न वेति मम संशयमासीत् ।।

तादृशात् परिचयादवकाशे तेन पुस्तकमपि प्रहितं तत् ।
ज्ञायते किमपि तस्य चरित्रं नो मयेति बहुशः परितप्तः ।।

अद्य मङ्गलदिने मम यातः संशयस्तव वयस्य ! वचोभिः ।
सोऽपि मद्वचनतः कथनीयष्टङ्कनाथतनयो बहुधन्यः ।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दोषलेशदहितोऽसि वयस्य ! क्षम्यतामनुचिते यदि जाते ।
भूषिता सुललितैः पदजातैरागता न कविता भवदीया ।।

नैव तोषमगमंस्तव पत्रात् यादृशः कवितया कथितः प्राक् ।
प्रेषितं तव कृते कति वारं पद्यमेव न मया कथय द्राक् ।।

अर्थतः प्रतिभयाऽप्यवकाशैः साधनैर्बहुविधैश्च विहीनः ।
मान्यवैतनिकता भवदीया कीदृशी गतिरिहास्ति मदीया ।।

पाठनं च पठनं कवितां वा संस्कृते न कुरुसे पठितः सन् ।
तेन संप्रति धरा बहुभारा न द्रुमैर्न गिरिभिर्न समुद्रैः ।।

आंग्लभाष्यविषयेष्वपि पारं संस्कृतेऽपि कवितामयसारम् ।
लब्धकीर्तिरपि संसदि नाहं यादृशस्त्वमसि का तव चिन्ता ।।

तेन मित्र भवतापि मदर्थं प्रेषणीयमतिसुन्दरमर्थम् ।
कान्तया कवितया कमनीयं पद्यपत्रमपहाय विलम्बम् ।।

कामये तव पुनः स्पृहणीयां मित्रवर्य ! कवितां रमणीयाम् ।
आग्रहः सविनयोऽस्ति सदाऽयं तावको भरत एव सखाऽयम् ।।

(२०२२ भाद्र ४)

[७]

द्वाविंशेऽहनि संप्राप्तमाषाढस्य त्रयोदशे ।
भवता प्रोषितं पत्रं रुचिरं मामके करे ।।

सदायादस्य ते देहे कौशलं कामयेऽनिशम् ।
कुशलीव भ्रमन्नस्मि वयस्य भवकाननम् ।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पवनैर्हिमशैलस्य नदीभिश्च सरोवरैः ।
गोरसैः परिपूर्णस्य स्वास्थ्यहानेर्न सम्भवः ।।

गण्डकीनिकटग्रामवास्तव्यस्यापि तेऽधुना ।
यद्यस्वस्थदशा जाता का कथा काष्ठमण्डपे ।।

प्रावृट्समयतः प्रायो वह्निमान्द्यं प्रजायते ।
अम्लचूतफलानां च सेवनादामसम्भवः ।।

चिरकालेन संप्राप्तः पठनावसरो मया ।
कवितायास्त्वदीयाया भारत्या च दिवौकसाम् ।।

संमदार्णवसंमग्नमानसोऽहं मुहुर्मुहुः ।
पठन् प्रतिपदं कान्तं स्मरन् संदर्शनं तव ।।

व्यावहारिकचिन्ता तु ममैव भवतोऽधिका ।
उदरस्य दरी चैव सदैवाऽस्त्येव दुर्भरा ।।

शिक्षणात्पाठशालायां महाविद्यालयेष्वपि ।
व्युत्पत्तेः प्रतिभायाश्च विकासो दृश्यते तव ।।

किं तर्कयामि कवितां तनुवाग्विभवोऽप्यहम् ।
त्वदीयां प्रेरणां मन्ये यच्च किंचिद्विलिख्यते ।।

भवान् पूर्णो घटः काले कविताम्भोनिषेचकः ।
अहमर्धो घटो व्यर्थं जल्पन्नस्मीति चिन्त्यते ।।

किं लिखाम्यधिकं सर्वास्त्रुटयो यान्तु सह्यताम् ।
व्यक्तहार्दिकसौजन्यां कामये कवितां पुनः ।।

(२०२२ आषाढ ३०)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

देवकोटा–माधवप्रसादं प्रति—

श्रीमद्भिः सर्वशास्त्रोदधिपरिमथने मन्दराकारधीभिः ।
सौजन्यं व्यञ्जयद्भिः प्रकटितकविताकान्तिभिः सारविद्भिः ।
स्नेहोद्गारैः सुधाभं नवमितदिवसे फाल्गुने प्रेषितं तत्
पत्रं हृद्यं पवित्रं करतलमकरोत् षोडशे फाल्गुनेऽस्मिन् ।।

सदा भ्रामं भ्रामं जठरभरणार्थं प्रतिदिशं
परिश्रान्तः कामं विरहितविरामं पुनरहम् ।
यशोराशिः किं मे किमथ कविताकौशलमिदं
प्रसादः सर्वोऽयं गुरुजनशुभाशीर्वचनजः ।।

'भारती–वैभवं' चार्यया गुम्फितं
शास्त्रपुष्पोद्भवं सारभूतं मधु ।
श्लिष्टपद्यै रसैः शोभितं प्रोज्ज्वलं
किञ्चिदालोकितं चर्मणश्चक्षुषा ।।

पठामि च शनैः शनैः स्वसमयेऽवकाशेऽप्यहं
परं जडमतेः कदा भवति सम्यगालोचनम् ।
कृपा गुरुजनोद्भवा यदि मुहुर्मुहुर्लभ्यते
यथामति समीक्ष्य तज्जनसमक्षमानीयते ।।

कामये गुरुजनादनारतं
सोपदेशकवितां रसोज्ज्वलाम् ।
प्रार्थये त्रुटिषु केवलां क्षमां
बालको भरतराजनामकः ।।

(२०२५ फाल्गुन २१)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पोखरेल–हेमचन्द्रं प्रति—

अपार–संसार–समुद्र–धीवरैः
सुधीवरैः काव्यकरैः सुहृद्वरैः ।
तटस्थधीरत्ववटंकसंश्रयैः
स्फुटीकृतं सौहृदमात्मनो मयि ।।

रसेन वात्सल्यमयेन शैशवात्कृता पितृत्वस्य समुन्नतिर्यथा ।
तथैव देहोऽपि बलाद्विसर्जितः कियद्विचित्रा नियतेर्विडम्बना ।।

गतं गतं सम्प्रति चिन्तया तया न मानसं दैन्यमपाकरोति चेत् ।
विमृश्य धीरत्ववता सुधीमता सुधीरता सा भवता स्थिरीकृता ।।

यथा मया जीवनसङ्कटेऽद्भुते प्रतिक्षणं दुर्नियतेः प्रतारणा ।
प्रसाधिता प्रस्तरचेतसा तथा, कुतो मदन्यो विधिवञ्चितो जनः ।।

परं कथा सा श्रुतिगोचरीकृता तदा व्यथा साऽधिरुरोह मानसे ।
यथा पयोधिः पवनप्रचालितस्तथैव येनास्मि सखे ! प्रकम्पितः ।।

स्वयं स्वमाश्वासयितुं क्षमो भवान् विलिख्य सम्बोधयतिस्म मां यतः
अतोऽहमप्यश्रु विमृज्य नेत्रयोर्लिखाम्यजानन्नपि देवभारतीम् ।।

कदाचिदुन्मज्य पुनर्निमज्जितैर्भयानकावर्तशते गतागतम् ।
प्रकुर्वतां पण्डितमानिनां नृणां चकास्तु सांयात्रिकता भवार्णवे ।।

उपाधयो यान्ति शमं समाधिना क्षणात्क्षयं यान्ति यथाऽगदैर्गदाः ।
तथा समाधेरपि योगवर्त्मनो भवान् निदिध्यासपरः श्रुतं मया ।।

न मादृशः क्वापि भवान् स्खलद्गतिर्जलोद्धतादावपि यः स्फुरन्मतिः
सुवर्णचन्द्राभिधया न केवलं रसात्मकत्वादपि पुष्करालयः ।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

क्व चन्द्रहासस्य कथा क्व मादृशस्तथापि किञ्चित्कविताकुतूहलम् ।
यथाकथञ्चित् प्रकटय्य दर्शिता भवादृशे, नैव ममास्ति वाग्मिता ।।

बलाबलत्वं समयेन जायते श्रुतं कुतश्चित्कविनाम्युदीरितम् ।
तदेव जाता चरितार्थताऽधुना ततो मनो याति निराशतास्पदम् ।।

गजा विविग्ना मशकाः समुन्नताः शठाः प्रमत्ताः सुधियः समाकुलाः
विकाशशीलः किल काष्ठमण्डपः कथं विनश्यन्निव हन्त ! दृश्यते

न विद्यया वा तपसा न सेवया, न चापि काव्यप्रतिभागुणेन वा ।
जडा नवोन्मेषविहीनतां गता द्विषन्ति छन्दः कवितां समत्सराः ।।

विहत्य सर्वाः फललिप्सया क्रियाः स्वकीयकर्तव्यपरेण भूयताम् ।
यदेव गीतावचनं प्रचोदयेत् तदेव मन्ये नितरां शुभंकरम् ।।

स्वकीयवंशस्थपरम्पराजुषा मयापि वंशस्थमयी सरस्वती ।
यथाकथञ्चिल्लिखिता समर्पिता मिलिन्दतां यातु भवत्कराम्बुजे ।।

भवदक्षरदर्शनलोलुपता
वितनोति ममाऽभिनवाः कविताः ।
चिरशान्तिमयी दयिता कविता
कमनीयतमा भवतः कविता ।।

(२०४० भाद्र १५)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

परिशिष्ट*



भोलनाथेन सह लेखकः । आचार्यपरीक्षावसाने २०१९ चैत्र १० दिवसे

प्रतिभाः प्रकटीकृत्य पत्रादानप्रदानतः ।
अकाण्डेऽदर्शनं यातो भोलानाथः स्मृतिस्थितः ।।

– लेखकः

---

* भोलानाथपराजुली–माधवप्रसाददेवकोटा–हेमचन्द्रपोखरेलमहोदयैः प्रेषितानि पत्राण्यत्र प्रस्तूयन्ते ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पराजुली-भोलानाथस्य सप्त पत्राणि—

[१]

अयि प्रियवयस्य !

समुपेत्य विमानवर्त्मना
त्वरितं दैन्यमयं निजालयम् ।
भवदीय-वियोग-वह्निना
ज्वलितान्तःकरणोऽस्त्यचेतनः ॥

भवदीय-शरीरभावुकं
परमेशो वितनोत्वहर्निशम् ।
परितः परिवारवेष्टितः
कुशलीवास्मि वयस्य ! साम्प्रतम् ॥

भवता प्रतिभाप्रभावता
समतामाश्रयता हनूमतः ।
परिणामत एव लंघ्यते
बृहदाचार्यपरीक्षणोदधिः ॥

शिथिलां स्मृतिशक्तिमीयुषः
सततं कुण्ठितशेमुषीजुषः ।
शुभभाग्यपथादपेयुषो
मम लक्ष्यं विफलीभविष्यति ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भवता वसता सुखावहे
हृदयग्राहिणि काष्ठमण्डपे ।
अतिदूरगिरिस्थितोऽप्ययं
स्मरणीयः समये भविष्यति ।।

शरीरमात्रेण द्विधाभूतः
भोलानाथपराजुली (पोखरा)
(२०१९ चैत्र १८)

[२]

विमानमारुह्य प्रकृष्टवेगं
ग्राम्यं गृहं प्राप्तवता स्वकीयम् ।
भवद्वियोगाकुलमानसेन
सद्यो हि पत्रं प्रहितं मयाऽऽसीत् ।।

प्रतीक्षमाणेन चिरं मुदावहं
तदुत्तरं हन्त ! मया न लब्धम् ।
सौहार्दरम्यं तव मित्र ! सङ्गं
स्मरन्नहं केवलमस्मि साम्प्रतम् ।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नैवागतं त्वत्करपद्मयुग्मं
पत्रं मदीयं किमु तन्न जाने ।
अयं सुहृद्विस्मृतिमेव नीत-
स्त्वया किमित्यस्मि भृशं विषण्णः ।।

प्रियासनाथस्य कलेवरे ते
भवो भवेशो वितनोतु भव्यम् ।
वयस्य ! वर्ते कुशलीव चाऽहं
कलत्रपुत्रादिसमूहयुक्तः ।।

मन्ये परीक्षोदधिपारगामी
निश्चिन्त एवास्ति भवान्मनीषी ।
स्मृत्वा परीक्षां दुरुदर्कगर्भां
वर्वर्मि चाऽहं सततं विषण्णः ।।

त्वया सुहृद्वर्य विवेकशालिना
स्वं प्रेष्य पत्रं कविताभिरम्यम् ।
निवारणीयो विरहातुरस्य मे
प्रवर्धमानो हृदयाधितापः ।।

शरीरमात्रेण द्विधाभूतः
भोलानाथपराजुली
(२०२० वैशाख ३)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

हे मित्रवर्य ! प्रहितं त्वया तत् पत्रं द्वितीयेऽहनि माधवस्य ।
सूर्यास्तकाले दिवसे च षष्ठे करं मदीयं समुपाजगाम ।।

हस्ताक्षरं तें कविताभिरम्यं सुशीतलं तोयमिवाधिगम्य ।
भवद्वियोगानलजायमानो मच्चित्ततापः शिथिलीबभूव ।।

आकस्मिकैः शीतभवैर्ज्वराद्यैर्देहो ममासीत् प्रियमित्र ! रुग्णः ।
नाशक्नुवं तेन विहीनशक्तिः पत्रोत्तरं प्रेषयितुं तदानीम् ।।

याचे क्षमां त्वां स्पृहणीयमूर्तिं विद्यान्वितं धैर्यवतां वरिष्ठम् ।
असभ्यतापूर्णनगाधिवासी बद्धाञ्जलिः क्षीणविवेकशक्तिः ।।

सुमङ्गलं त्वां विदधातु देवो लोकत्रयीरक्षणनित्यसक्तः ।
गार्हस्थ्यदैनन्दिनकार्यजातैः सन्तप्तचित्तः कुशलीव वर्ते ।।

न वर्तते मामकलेखशैली हृद्या तथा शीघ्रगतिस्तवेव ।
अभ्यासहीनः प्रतिभाभिभूतः शून्यावकाशोऽस्मि सखे ! सदैव ।।

आद्यस्य पत्रस्य वयस्य हन्त ! योग्योत्तरं दातुमहं न शक्तः ।
तस्मात् परीक्षां परिचिन्त्यमानो दुनोति चेतः प्रसभं मदीयम् ।।

तस्मात् परीक्षां पुनरेव दातुं तत्रोपयातो विभृतं यतिष्ये ।
लब्ध्वा सुखं त्वत्सहवासजन्यं हृद्वेदनां दूरगतां करिष्ये ।।

स्मेराननां जन्मभुवं विधातुं लोकोत्तरं जातु कृतो न कर्म ।
अज्ञानमोहादिविनष्टबुद्धेर्वृथैव मे मानवजन्म यातम् ।।

पत्रं न वा हस्तगतं मदीयमुपेक्षितोऽहं किमु वा त्वयेति ।
पृष्ट्वाशु मान्यं गुरुरामनाथं संप्रेषयोदन्तमतीव सत्यम् ।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पत्रं स्वकीयं नवभावरम्यं नव्यैरुदन्तैर्मधुरैः सनाथम् ।
लप्स्ये कदा द्रष्टुमिति प्रकामं समुत्सुकं मामकमस्ति चेतः ।।

सौहार्दपूर्णचित्तस्य भवतः करुणावतः ।
स्मृतिगोचरतो बाह्यो न भवेयं कथंचन ।।

एकहृदयमित्रम्
भोलानाथपराजुली
(२०२० वैशाख १२)

[४]

वैशाखस्याहनि वसुमिते प्रेषितं सारगर्भं
पत्राम्भोदं नयनसुखदं नीलवर्णं विलोक्य ।
चिन्ताभारं चिरविरहजं दूरमुत्सृज्य सर्वं
मित्राब्धे ! ये समजनि मनोबर्हिणो नृत्यसक्तः ।।

जायापुत्रैः सह निजगृहे तिष्ठतो राजधान्यां
विभ्राणस्याखिलसखिगणैः कीर्तितां चित्तवृत्तिम् ।
दोषैः शून्यां रसगुणयुतां गुम्फतः पद्यमालां
विद्याभारैर्विनतवपुषः कामये मङ्गलं ते ।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मुक्ताकल्पान्सततमतुलान्स्वेदबिन्दून्प्रवाह्य
मासस्यान्ते करमुपगतैर्वेतनैरल्पसंख्यैः ।
दुःखाक्रान्तं निजपरिजनं पालयन् खिन्नचित्तः
शून्यं पश्यन् त्रिभुवनमहं कौशलं किं ब्रवीमि ॥

नीत्वा नाशं कथमपि सखे रूप्यकाणां सहस्रं
चैत्रे दत्तामशुभफलदां चिन्तयित्वा परीक्षाम् ।
खिन्नस्वान्तः प्रतिदिनमहं पत्रिकां पद्यबद्धां
नव्योदन्तां हृदयसुखदां तावकीनां प्रतीक्षे ॥

भवदीयः
भोलानाथः पराजुली
(२०२० वैशाख १७)

[५]

संप्रेषितं श्रावणसप्तविंशे हे मित्र ! पत्रं भवता विपश्चिता ।
दिने द्वितीये दशवादनान्ते भाद्रस्य मत्पाणितलं प्रपेदे ॥
प्रेम्णा मयाऽऽनन्दवशेन सद्यस्त्वदीयपत्रं पठितं त्रिवारम् ।
आकर्षकत्वात्तव लेखशैल्याः तृप्तिं ययौ नैव मदीयचित्तम् ॥
दृष्टो मयाऽद्यावधि नैव भूमौ सुहृद्वरः कोऽपि भवत्समानः ।
लोकोत्तरप्राक्तनपुण्यजन्यं सौभाग्यमेतत्खलु मामकीनम् ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वास्तव्यता सुन्दरराजधान्यां प्रशंसनीया च कवित्वशक्तिः ।
उभे त्वदीयां प्रगतिं मुदावहां दिने दिने वर्धयते नितान्तम् ।।

सङ्गं सतां बुद्धिमतामुपेतः लब्धावकाशे दिवसे यथेच्छम् ।
विवेकविद्याप्रतिभासमेतः कथं न कीर्त्योऽस्ति भवान्मनीषी ।।

ग्रामस्थितो बुद्धिविवेकहीनः शून्यावकाशः परितप्तचित्तः ।
परित्यजन् देशहिताय मार्गानहं कथं स्यां नरशब्दवाच्यः ।।

आचार्यमूल्याङ्कनकार्यकर्त्रा लेखानुसारेण परीक्षकेण ।
द्वितीयपंक्तौ गणितस्य नूनं ममास्ति चित्तं परितोषयुक्तम् ।।

आचार्यलब्धाङ्कविलोकनेच्छा पूर्णाऽभवन्नौ मुदमावहन्ती ।
हर्षास्पदं वाक्यमिदं यदावामाचार्यपारं समुपागतौ स्वः ।।

प्रमाणपत्रग्रहणेच्छयैव दीक्षान्तकाले समुपस्थितिर्मे ।
संभाव्यतां यास्यति वा नवेति निर्णेष्यते मित्र ! सहस्यमासे ।।

नेपालिभाषातुलशब्दकोषः सर्वाङ्गपूर्णो बहुमूल्यलभ्यः ।
आवश्यकोऽस्त्यद्य नितान्तमेव संप्रेष्यतां मित्र ! यथानुकूलम् ।।

लभ्येत सेवा यदि तत्र योग्या स्थाने क्वचित्स्थायिनि राजकीये ।
त्यक्तुं गृहं स्वं परिवारयुक्तं सदैव वर्वर्मि सखे ! सचेष्टः ।।

संवेष्टितस्यानुदिनं वयस्य ते प्रेमातिपात्रैर्दयितातनूजैः ।
कलेवरं क्षेमपथानुयातं करोतु देवो भुवनाधिनाथः ।।

पुण्यप्रतापैः खलु तावकीनैर्निरामयोऽहं परिवारयुक्तः ।
स्मरन् त्वद्वीयं विमलं चरित्रं प्रसन्नचेता गमयामि कालम् ।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

चेतोहरैर्भावरसैः समन्वितं पत्रं त्वदीयं कविताभिरम्यम् ।
लप्स्ये कदा द्रष्टुमिति प्रकामं प्रतीक्षते मे हृदयं सदैव ।।

भवदीयः
भोलानाथः पराजुली
(२०२० भाद्र ७)

[६]

सुहृद्वर्य, भरतराज पन्त !

वैशाखस्य त्रयोविंशे प्रेषितं धीमता त्वया ।
पद्यात्मकं रम्यभावं पत्रं मत्करमाययौ ।।

पत्रे त्वया कृतोल्लेखं दयया परिपूरितम् ।
हार्दिकं प्रणयं वीक्ष्य निमग्नोऽस्मि मुदम्बुधौ ।।

परिवारसनाथस्य राजधानीनिवासिनः ।
भवतः प्रियमित्रस्य कामये चिरजीवनीम् ।।

अभावादवकाशस्य समये पत्रप्रेषणे ।
शक्तिहीनस्य ग्राम्यस्य क्षन्तव्या मे त्रुटिस्त्वया ।।

प्रमाणपत्रं कोषं च द्रष्टुमुत्सुकमानसः ।
प्रेषयिष्ये यथाशीघ्रं रूप्यकाणां च त्रिंशतम् ।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तत्रागन्तुं श्रावणेऽहं यतमानोऽपि भूरिशः ।
अद्यावधि न यातोऽस्मि पद्धति विश्चयात्मिकाम् ।।

भवतो मित्र ! सौजन्यं प्रतिभा च सुदुर्लभा ।
दिने दिने मे हृदयं नयतो विस्मयाम्बुधौ ।।

सुहृद्वर्य ! न शक्नोमि विस्मर्तुं त्वां कदाप्यहम् ।
मच्चित्तकुड्ये ते चित्रं स्थायिरूपेण वर्तते ।।

अत्राहं कुशली वर्ते कलत्रात्मजवेष्टितः ।
चिन्तयन् सफलीकर्तुं जीवनं मुक्तिमुत्तमाम् ।।

प्रेषणीयं यथाशीघ्रं रम्यभावसमन्वितम् ।
सरसं कवितारूपं पत्रमाकर्षकं त्वया ।।

मनसा वचसा च कर्मणा
परकीयं हितमिच्छतस्तव ।
स्मृतिगोचरतो बहिष्कृतो
न भवेदेष जनः कथंचन ।।

त्वत्कुशलाकांक्षी
भोलानाथः, पराजुली
(२०२१ ज्येष्ठ १)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

श्रीप्रियमित्र, भरतराजशर्मन् !

आमरोगेण ग्रस्तोऽहं दैवादस्वस्थतां गतः ।
पत्रोत्तरं प्रेषयितुं नाऽलभेऽवसरं शुभम् ।।

भवता ज्येष्ठमासस्य नवविंशेऽह्नि प्रेषिता ।
पत्रिका मत्करं प्राप्ता वितेने विपुलां मुदम् ।।

अत्राऽहं कुशलीवास्मि तव पुण्यप्रभावतः ।
कामये भवतो गात्रमाधिव्याधिविवर्जितम् ।।

सर्वतो व्याप्तचित्तस्य विषादैर्व्यावहारिकैः ।
दौर्भाग्यशालिनो जाता कविता विमुखी मम ।।

व्युत्पत्तिप्रतिभाभ्यासैर्वञ्चितं शेमुषीजुषम् ।
गच्छतो मम मन्दस्य प्रस्फुरेत्कविता कुतः ।।

कवित्वशक्ति प्रखरां सदा नर्तयतस्तव ।
कवितां सचमत्कारां त्वरते पठितुं मनः ।।

क्षन्तव्या भवता मित्र ममाऽज्ञानवशा त्रुटिः ।
समीहे पत्रिकां रम्यां तव सौहार्दभूषिताम् ।।

भवच्चिरन्तनवयस्य
भोलानाथः पराजुली
प्राध्यापकः
पृथ्वीनारायणकलेज, पोखरा
(२०२२ आषाढ १३)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

देवकोटा–माधवप्रसादस्य पत्रम्—

श्रीमत्सु साहित्यसर्जनार्जितयशोराश्यार्जितसहृदयेषु सौजन्यधन्येषु पन्तमहोदयेषु प्रेमपुरःसरा नमस्काराः ।

सहृदयाः

कुशलं कामये भवताम् !

श्रीमद्भिः प्रेम्णा प्रहिते 'जूनकीरी–तपस्विन्यौ' समासादिते । श्रीमतां सत्कर्मिकां स्मृतिं समीक्ष्य भूयान्प्रमोदोऽनुभूतः । आशासितश्च भविष्येऽपि यदा कदैवं संस्मरणं विधास्यतीति ।

१) पठिता मया 'जूनकीरी'–प्राचीनमर्यादायाः पोषिकाभिः सहैव नवीनभावनाया उद्भाविनीः कविता अत्र पृष्ट्वा सव्यसाचित्वं भवतोऽवधार्यं नरीनर्ति मे चित्रवृत्तिः । अत्र–

पैल्हे सानै भए होस् पिलिपिलि कणिका जुन्किरी झैं हुँदै जा
त्यँ कालो मेघमाला छिलिमिलि बिजुलीतुल्य राम्रो हुँदै जा ।
चिर्दै गाढा अँध्यारो चरचर सहजै सूर्य झैं झल्कँदै जा
प्यारो पीयूषवर्षी चमचम नभमा चन्द्र झैं चम्कँदै जा ।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

इति मयाऽऽशंसितं तथैव कविता पीयूषवर्षणस्तरमारुह्य परिलक्ष्यत इति सन्तोषावहो मे विषयः सुप्रसन्नाः समुचिताऽलङ्काराः रसोद्गारिण्यः क्रमिकगत्या परिष्कृतस्वरूपाः समीक्षन्तेऽत्र विविधच्छन्दःसु नर्तनपरायणाः कविताः ।

२) झरेर शय्याबिच फूल केशको
बिझाउँथ्यो कोमल अङ्ग बैंसको ।
कठै ! गरी हात सिरान भूमिमा
त्यसै लडेकी तप निम्तिमा उमा ।।

इत्यादिरूपेण कुमारसम्भवीयपञ्चमसर्गात्मिका कालिदाससरस्वतीसमच्छन्दच्छाया नेपालीभाषयाऽनूदिताऽपि सती रसोल्लासकरणकां सहृदयहृदयाह्लादनस्वाभाव्यान्न प्रधावितेति एतदपि कवेरुत्कर्षं पुष्यात् ममापि हर्षं पुष्णाति । किं भूयसा भाषणेन ? रसचर्वणचतुरा वर्णयन्त्येव नूनम् ।

प्रसङ्गात्प्रेमात किञ्चित्प्रस्तूयते– न जायेताऽरुचिः सति रागे लब्धे चावकाशे 'भारतीवैभवं' समालोच्य स्वानुकूले कस्मिन्नपि पत्रपत्रिकादौ प्रकाशयन्तु श्रीमानिति । पत्रव्यवहारो यदाकदा विधेयेति धन्यवादं विश्राव्य च विरमामि ।

भवतां श्रेयस्कामी
माधवप्रसादः देवकोटा
(२०२५ फागुन ९)
तावसेव, पाल्पा

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पोखरेल–हेमचन्द्रस्य पत्रम् —

विधिप्रतिहतो भवानपि पुरा मदीयविपदं च वेत्ति सकलम् ।
नितान्तवियतिप्रताडितमतिः कथं कथयतां करोतु कविताम् ।।

करो हि जडताडितो हतबलस्तथैव कठिनी स्वभावकठिना ।
तुषाग्निरिव दाहकोऽस्ति विषयो मया वत ! कथं क्रियेत कविता !

दलद्वयमहो पुरैव भवता मदीयविपदं सहानुभवता ।
विलिख्य विजसौहृदं प्रकटितं कृतार्थितधिया मयापि पठितम् ।।

भवान् क्व सुचिरप्रसाधितकरः करः क्व च सदा ममालसतरः ।
तथापि समुदो मुदे हि भवतो लिखामि यदुदेति चेतसि मम ।।

(रसैर्जसजसा जलोद्धतगतिरिति लक्षणाज्
जलोद्धतगतिवृत्तम्)

भवत्कराम्भोरुहरेणुरूषितं गभीरभावावलिभिर्विभूषितम् ।
प्राप्यापि पत्रद्वयमत्र सत्रपं यदुत्तरं नालिखमर्थये क्षमाम् ।।

यथा पुरा दैत्यचमूर्विडौजसा तथाऽधुना दुर्विधिना हतौजसा ।
मया स्ववृत्तं लिखितुं न पार्यते यथाकथञ्चिद् धृतिरेव धार्यते ।।

आत्मानमुन्मोचयितुं भवादृशात् सम्प्रेष्यते पर्युषितापि पत्रिका ।
मदक्षरालोकनलोलुपाय ते प्रसादहेतुश्च भवेदितीहते ।।

(वंशस्थेन्द्रवंशयोरुपजातिवृत्तम्)

हेमचन्द्रः पोखरेलः
(२०४० भाद्र ७)
घनकुटा

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पन्तेतिवृत्तम्

कृष्णातटनिकटस्थं लक्ष्मीनारायणस्य चायतनम् ।
श्रुतपूर्वं पद्ययुगं* पितृव्यतः कुड्यकुट्टितं तस्मिन् ।।

प्रयागवसतिः श्रीमानिन्द्रः कविवरः सुधीः ।
नव तस्याऽभवन् पुत्रा विद्वांसः सर्व एव ते ।।

तेषां कनीयान् पुत्रस्तु रमापतिरिति श्रुतः ।
निर्मितं तेन रुचिरमिन्दिरापतिमन्दिरम् ।।

रमापतेः सुतावास्तां लब्धवर्णौ ततः परम् ।
प्रथमः शिवरामस्तु हरिरामो द्वितीयकः ।।

शिवरामस्य पुत्रास्तु दत्तात्रेयप्रसादतः ।
शिवो भवश्च रुद्रश्च दत्तभाजस्त्रयोऽभवन् ।।

भवस्य मध्यमस्यैव तनयाः पाण्डवायिताः ।
मायाश्रीव्यासतो ज्वाला–सुकृतीति बहुश्रुताः ।।

ज्वालादत्तः कर्मकाण्डो ज्योतिर्विद्याविशारदः ।
तोयनाथादयो यस्य शिष्याश्चाऽऽसन् प्रकीर्तिताः ।।

---

* व्यासदत्तः → कृष्णदत्तः → वाचस्पतिः → हयग्रीवो मम पितृव्यः, यस्माविदमितिवृत्तमवगतम् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यद्धस्तलिखितं किञ्चित्पश्चाङ्गमवशिष्यते ।
यतः प्रचलिता लोकं पश्चाङ्गस्य परम्परा ।।
कार्तवीर्योदयात्काव्यान्महाकविपदाञ्चितः ।
सुकृती तनयौ यस्य पद्मनाभबृहस्पती ।।
तस्मादपुत्रतां यातो वंशः सुकृतिनः कवेः ।
दौहित्रवंशविस्तारो नाऽत्र विस्तीर्यतेऽधुना ।।

ज्वालादत्तस्य पुत्रोऽभूदग्निदत्त इति श्रुतः ।
बहुभाषाविशेषज्ञो विद्वन्मण्डलमण्डितः ।।
अग्निदत्तसुतो लक्ष्मीदत्तनामाऽभवत्कविः ।
इन्दूपनामा विख्यातो मोतीरामस्य मण्डले ।।
लक्ष्मीदत्तस्याग्रजन्मा भ्राता चासीन्महेश्वरः ।
विवाहावन्तरं यातः कथामात्रावशेषताम् ।।
लक्ष्मीदत्तसुतः ख्यातो मणिदत्तमहोदयः ।
संस्कृतांगलवङ्गादिभाषासु कृतसंग्रहः ।।

*शम्भुनाऽभिन्नमित्रत्वे दूरं निर्वासिते गते ।
मणिना ज्वालिताः सर्वाः कविता भीतिहेतिभिः ।।
यौवने प्रथमा पत्नी कालेन कवलीकृता ।
भूयोऽपि पुत्रकामेन ललिताऽऽख्या विवाहिता ।।
एकोऽवशिष्टः पुत्रोऽहं तयोः सन्तानपूरकः ।
वर्षत्रये जनन्याऽपि वञ्चितः पितृपालितः ।।

---

* आशुकविः शम्भुप्रसादढुंगेलः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

चतुर्दशाब्दः सञ्जातः पितुः स्नेहेन शिक्षया ।
विवाहानन्तरं प्राप्तः पिता मे पितृसन्निधिम् ।।

वाटिकावेष्टितं गेहं भार्या नवविवाहिता ।
वदन्नासीत्पिता कक्षे ते हि नो दिवसा गतः ।।

दिनेशो ज्येष्ठपुत्रोऽभूच्चतुर्विंशतिहायनः ।
कुसङ्गसङ्गदोषेण सम्प्राप्तः शोककाव्यताम् ।।

कनिष्ठतनयः शेषो रमेशोऽपि विवाहितः ।
तस्यापि तनयो नैव तिस्रा दुहितरोऽभवन् ।।

विदेशं भ्रममाणोऽपि राजपत्राङ्कितोऽपि सन् ।
दुर्वृत्तैर्दस्युभिर्दुष्टैरपहृत्य विनाशितः ।।

दुहिता शेषवात्सल्या कल्पनाऽपि गृहं गता ।
कन्याद्वयं च तस्याऽस्ते नप्तारः पञ्च कन्यकाः ।।

भार्या तु मम चित्राऽख्या विक्षिप्ता विलयं गता ।
कविता कामिनीदानीं किञ्चित्तोषाय जायते ।।

तनयौ, दुहिता, पत्नी, पारिवारिकभाविकम् ।
स्मारं स्मारं विषण्णोऽहं ते हि नो दिवसा गताः ।।

पितृभक्तो गतः पुत्रश्चत्वारिंशतिहायनः ।
गतं वयो गतं सर्वं ते हि नो दिवसा गताः !

मत्तः परतरो वंशे कुमारस्य न सम्भवः ।
रघुवंशावसानेऽस्मिन्नग्निवर्णायितोऽभवम् ।।

— नयननीरनीरधिनिमग्नः पन्तः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

लेखकः भरतराजः पन्तः

जन्मः ऋतुनागनवेन्दुवैक्रमे

शिक्षाः संस्कृतसाहित्याचार्यः

नेपालीसाहित्य–एम्. ए.

वृत्तिः पदं च –

सह-प्राध्यापकः सरस्वतीविद्यापीठं

त्रिभुवनविश्वविद्यालयान्तर्गतम् ।

नैपालकाः प्रकाशिताः कृतयः

कविता–

उर्लेको आँसु (पुस्तिका) २०१२, जूनकीरी (कविता संग्रह) २०२३ ।

अनुदित–

तपस्विनी (कुमारसम्भव पाँचौं सर्ग) २०२५ ।

एकादशिका (एघारओटा स्तोत्र) २०४३ ।

खण्डकाव्य–

दिनेश (शोक काव्य) २०२८ । शैलपुत्री (प्रकृति काव्य) २०३९ ।

चन्द्रहास (पौराणिक) २०३९ । भित्र–बाहिर (वैचारिक काव्य) २०५० ।

गद्य–

भरतराज पन्त (जीवनी) नयाँ संस्करण २०४९ ।

हातको तकिया (लेख संग्रह) २०४१ । पन्त बा ! (संस्मरण) २०४९ ।

महाकाव्य–

दोभान (महाकाव्य) २०४१ । नमस्कार (मुक्तक काव्य) २०४६ ।

मेरो रमु ! (शोक काव्य) २०४८ ।

हास्यव्यंग्य–

गुन्द्रुक (संकलन) २०५० ।

Jayatu Sanskritam, Kathmandu, Nepal